॥ ॐ अर्हँ नमः ॥

॥ सकलस्वपरसमयाब्धिपारीणशासनसम्राट्सूरिचक्रचक्रवर्त्तिश्रीतपागच्छनभोनभोमणिभट्टारकाचार्य-

**श्रीविजयनेमिसूरीश्वरसद्गुरुभ्यो नमः ॥**

तत्पट्टालङ्काराऽवाप्त—न्यायवाचस्पति—शास्त्रविशारदोपनाम—श्रीतपागच्छभट्टारकाचार्यश्री**विजयदर्शनसूरि**प्रणीता

# ॥ श्रीपर्युषणपर्वकल्पप्रभा ॥

श्रीसूर्यपुर(सुरत)गोपीपुरास्थ जव्हेरी छगनभाइ फुलचन्द—जव्हेरी रूपचन्द घेलाभाइ—शाह—अमरचन्द वजेचन्द
इत्याख्यश्राद्धवर्यत्रयसमर्पितद्रव्यसाहाय्येन—

प्रकाशकः—**श्रीराजनगरस्थ—श्रीजैनग्रन्थप्रकाशकसभा**कार्यवाहकः श्रेष्ठि—मूलचन्द्रात्मज ईश्वरदासः

वीरसंवत् २४६९ प्रतयः ७५०—२० काश्मीरीयपत्रे प्रथमावृत्तिः विक्रमाब्दः १९९९

मुद्रणादयस्सर्वेऽप्यधिकाराः स्वायत्तीकृताः प्रकाशकसभया । पुस्तकमिदं मुम्बय्यां निर्णयसागर-मुद्रणालये
कोलभाटवीथ्यां २६-२८ तमे गृहे रामचंद्र येसू शेडगेद्वारा मुद्रयित्वा प्रकाशितम् ।

Printed by Ramchandra Yesu Shedge, at the "Nirnaya-sagar" Press, 26-28, Kolbhat Street, Bombay.

Published by Sheth Ishvardas Mulchand, for the S'ri Rjanagara Jaina Granthā Prakās'aka Sabhā, Kikābhat Pole, Ahmedabad.

श्रीसार्वतत्त्वरससङ्गतितस्सुवर्ण-भावं गते स्वगुरुहस्तकजार्पितेऽस्मिन् ।
क्षेत्रे सुबीजमिव वप्तृगुरोः प्रसादाद्, यत्नोऽत्र मे सफलतां कलयत्वजस्रम् ॥ १ ॥

## एतद्ग्रन्थकारप्रणीतग्रन्थनामानि—

मुद्रितानि

१ स्याद्वादबिन्दुः ।

२ ( खण्डनखाद्य ) श्रीमहावीरस्तवकल्पलताटीका ।

३ श्रीपर्युषणपर्वकल्पप्रभा–न्याययुक्तिगर्भा ।

४ श्रीपर्युषणपर्वकल्पलता ।

रच्यमाना

५ उपा० श्रीयशोविजयजीमहा० कृततत्त्वार्थप्रथमाध्यायटीकाविवृतिः ।

## ॥ श्रीपर्युषणापर्वकल्पप्रभाशुद्धिपत्रकम् ॥

| अशुद्धम् | शुद्धम् | पत्रम् | पृष्ठम् | पंक्तिः |
|---|---|---|---|---|
| किं स्व | किंस्व | ४ | १ | १० |
| देवा हि | देवा वि | ६ | १ | ६ |
| देवा हि | देवा अपि | ६ | १ | १३ |
| मङ्गिनां द्रागे | मङ्गभाग्भ्यश्चै | ७ | २ | १० |
| आलोड्यमानाः | आलोडयमानाः | ८ | २ | १२ |
| इच्छत | इच्छथ | ९ | १ | १३ |
| स्वपुत्र | सपुत्र | ९ | २ | १२ |
| कोटिं अ | कोटिम | ९ | २ | १३ |
| चतुमार्सासि | चातुर्मासि | १० | १ | १ |
| निस्सीमानृप | निस्सीमानुप | १४ | २ | ७ |
| जडाः | जडान् | १५ | १ | ५ |
| वाचनाऽऽदि | वाचनाऽऽदिदि | १५ | २ | २ |
| बन्नाति | बध्नाति | १६ | २ | १२ |
| बुब्बुया | चूचुया | २० | २ | ४ |
| पतद्गृहे | पतद्ग्रहे | २१ | २ | ११ |
| येक्षराः | यान्यक्षराणि | २६ | १ | १३ |
| तास्ते | तानि तानि | २६ | १ | १३ |
| ता इह | तानीह | २६ | १ | १३ |
| प्राघुर्णक | प्राघूर्णक | २८ | १ | ९ |
| लाहो | लाहा | ३० | २ | २ |

यत्र कुत्रापि वाक्ये पदान्ते मकारस्थानेऽनुस्वारः स्यात्तत्र मकारो वाच्यः । एवं 'सन्तोषितव्यं' स्थाने 'सन्तोष्टव्यं' वाच्यम् ॥

मूलचतुर्थे श्लोकेऽन्यत्र च 'क्षामणा'स्थाने 'क्ष्मापणा' षोडशे च 'पुनीता'स्थाने 'सुपूता' इति च वाच्यम् ॥

॥ ॐ अर्हं नमः ॥

॥ ऐदंयुगीनशासनाधिपतिसिद्धार्थनृपकुलमृगाङ्कत्रिलोकप्रभुश्रीमहावीरस्वामिने नमः ॥

॥ भारतवर्षभव्याब्जप्रबोधभास्करानल्पलब्धिनिधानयोगीश्वराय प्रभुश्रीगौतमस्वामिने नमः ॥

॥ न्यायव्याकरणसिद्धान्तादिपारावारावगाहनसमुपलब्धानल्पतत्त्वमणिसन्दृब्धादभ्रग्रन्थमालेभ्यः श्रीतपागच्छ-नभोनभोमणिभ्यः शासनसम्राट्-भट्टारकाचार्यश्रीविजयनेमिसूरिसद्गुरुभ्यो नमः ॥

तत्पट्टालङ्कारसम्प्राप्त-न्यायवाचस्पति-सिद्धान्तविशारदोपनाम-तपागच्छीयभट्टारकाचार्यश्रीविजयदर्शनसूरिप्रणीता

# ॥ श्रीपर्युषणपर्वकल्पप्रभा ॥

विनेया लोहास्त्वद्विमलचरणस्पर्शमणिक-वरस्पर्शाद्भक्तामरप्रणतपादाम्बुज ! जिन ! । श्रीमङ्गला-
सुवर्णीभूता द्रागहमपि विनेयस्तव विभो !, सुलोहं मां स्वर्णीकुरु मलविनाशेन सुकृप ! ॥ १ ॥ चरणम् ।

[१]ममाऽर्कवद् हृत्कमले करोति, [२]गुरुप्रकाशं विधुसौम्यदृष्टिः ।
[३]नेमिर्मनोरज्जुनियन्त्रणे यः, [४]सूरिः सहाय्यस्तु स मेऽत्र सिद्ध्यै ॥ २ ॥

शास्त्रोक्तपर्युषणपर्व भवाष्टकान्त-मोक्षप्रदायि सुसमाधिपरैर्जनैर्यत् ।
आराधितं निरुपमेयप्रभावमज्ञ-बोधाय तद्विशदपर्वविधिं ब्रुवेऽहम् ॥ ३ ॥

अथ मुखे जिह्वासहस्रवता कोविदेनाऽप्यगणेयगुणगणस्य पर्युषणपर्वण आराधनीयत्वे किं मानमिति चेद्? उच्यते–श्रद्धानुसारिणं प्रति शास्त्रमेव, यदनन्तज्ञानिभगवत्प्रोक्तशास्त्रसिद्धं तदविसंवाद्येव भवतीति तत्र किं प्रमाणान्तरगवेषणयेति सकलावलोकदक्षज्ञानदृष्टित्वात्तस्य, तर्कानुसारिणं प्रति युक्तिप्रयुक्तयोऽपि, तथाहि–अकुशलयोगनिरोधं कृत्वा कुशलयोगोदीरणेन धर्मकार्ये कुशलप्रवृत्त्या शुभात्मपरिणामवृद्धेर्यद्यन्महापुण्यबन्धसाधनं दुष्टाध्यवसायकृतपापप्रकृतिरूपदुष्कर्ममर्मविनाशकं चाऽभिनवनानाविधकर्मप्रतिबन्धकारकं च तत्तदाराधनीयं श्रीजिनकल्याणकतिथिवत्, श्रीशत्रुञ्जयमहातीर्थवच्च ।

पर्युषण-
पर्वण आरा-
धनीयत्वे
किं मान-
मिति शङ्को-
द्धारः ।

तथाविधं च श्रीपर्युषणपर्वेति तदप्याराधनीयं, तथाविधं च तद्यथा तथाऽग्रे वक्ष्यते, मोहान्धकारविलुप्तसत्पथे संसारे जिनवचनरत्नदीपालोकेन श्रेयोमार्गप्रवर्त्तकं पापामयविनिवारणे दिव्यौषधं सर्वसमीहितकरणे कल्पद्रुकल्पं यत्पर्युषणपर्व भवोद्धारकप्रभुवीतरागदेवप्रोक्तविधिना भव्यसत्त्वैः सम्यगाराधितं सन्मिथ्यात्विनो मिथ्यात्वहानं मलिनसम्यक्त्ववतो नयनस्याऽञ्जनवज्जलस्य कतकचूर्णवच्च सम्यक्त्वनैर्मल्यं निर्दयादेस्सदयादित्वमविरतिमतो विरतिमत्त्वं कृपणस्य दातृत्वं कुशीलस्य शीलसम्पन्नत्वं सकषायस्य निष्कषायत्वं चाऽशिक्षितपञ्चाचारस्य विविदिषाशमदमादिसहकृतपञ्चाचारग्रहणासेवनशिक्षणमल्पतपोवीर्यादेश्च सम्यग्ज्ञान-

सहितप्रबलतरतपोवीर्यक्षमावीर्यगाम्भीर्यवीर्यसंयमवीर्याद्युल्लासमसमाहितस्य च दर्शनज्ञानतपश्चारित्रलक्षण-चतुर्विधभावसमाधिं च भावरोगिणो भावारोग्यं च श्रीशत्रुञ्जयमहातीर्थराजवत् स्वप्रौढप्रभावमहिम्ना कारयति तत्पर्युषणपर्व मुमुक्षुणा सुविशुद्धयोगत्रयेण सद्भक्त्याऽवश्यमेवाऽऽराधनीयमित्यत्र किमु वक्तव्यं?, यतो मन्त्रि-रहितो राजा शस्त्रहीनो योद्धा कलां विना पुरुषः शीलेन विना सतीत्यादिवत्पर्युषणाराधनां विना साधुश्श्राद्धो वा न शोभते, सुशोभते च तीर्थेषु शत्रुञ्जयस्येव मन्त्रेषु नमस्कारमन्त्रस्येव सर्वपर्वसूत्तमस्याऽस्याऽऽराधनेनैव, रजनी चन्द्रेण नभस्सूर्येण सत्पुरुषेण कुलं कुसुमेन वल्लीत्यादिवत्।

पर्युषणपर्वाराधनाफलं प्रदर्श्यैतत्पर्वाऽऽराधनेनैव नरश्शोभत-इत्युपदर्शनम्।

अनुमानमुद्रा चैवं–पर्युषणपर्वाऽऽर्हतैराराधनीयं महापुण्यबन्धकारकत्वाच्छ्रीजिनकल्याणकतिथिवत्।

न च पर्युषणपर्वणः पूजाप्रभावनासाधर्मिकवात्सल्यतपस्विभक्त्यादिद्वारा महापुण्यबन्धसाधनत्वे सति तेन महापुण्येन भोगाप्तिः, ततो भवपरम्परा, मोहधाराभिवृद्धेः, न च "पुण्यापुण्यक्षयान्मुक्तिः" इति वचनादयं महापुण्यबन्धो मुमुक्षूणामिष्टः, यच्चाऽनिष्टसाधनं न तदाराधनीयं दुष्कृत्यवत्, पुण्यबन्धरूपानिष्टसाधनं च पर्युषणपर्वेति तदपि नाऽऽराधनीयमित्यनुमानबाधाऽत्रेति वाच्यं, यतो दाह्यं विनाश्य वह्नेरिव तस्य महापुण्यब-न्धस्य पापं विनाश्य नाशशीलत्वान्न चाऽयं मुक्तिपरिपन्थीति मुमुक्षूणामिष्टत्वान्नोक्तदोषः, भोगप्राप्तिरपि यदुक्ता साऽपि न, भोगानुभवोपनायकाध्यवसायाभावात्, कुशलानुबन्धानवद्यशुभक्रियानुष्ठाने मोक्षाभिलाषे-णैव कृतेऽप्यवशिष्टकर्मांशस्याऽवान्तरफलरूपयथाकथञ्चिद्भोगप्राप्तावपि शतक्षारपुटशोध्यरत्नन्यायेनाऽनेकभवे-

च्चप्रमादानाशंसादिभावकृतसम्यग्ज्ञानक्रियाशुभभावनाद्यभ्यासेन भावितमतेरुत्तरोत्तरभवाधिकतराधिकतमशुभानुष्ठानसेवनेनाऽन्ततः प्रकर्षकाष्ठापन्नविशुद्धक्षायिकभावावाप्तेर्मोक्षप्राप्तेः। उक्तं चाऽन्यैरपि—

"प्रयत्नाद् यतमानस्तु, योगी संशुद्धकिल्विषः। अनेकजन्मसंसिद्ध–स्ततो याति परां गतिम् ॥ १ ॥" इति।

एतच्चाऽग्रे स्फुटीभविष्यति। एवं पर्युषणपर्व आर्हतैस्सम्यगाराधनीयं, बहुवर्षकोटाकोटिसञ्चितनिकाचितकर्मणोऽपि निर्जराकारित्वात् चैत्रमासाद्यष्टाह्निकावत् जिनवचनवद्वा।

न चाऽत्र हेतोरसिद्धिरिति वाच्यं, पर्युषणपर्व महानिर्जराकारकं, शुभालम्बनत्वे सति शुक्लपाक्षिकाणां मनःप्रसादनिमित्तत्वात्, अर्हत्प्रतिमावत्। एवमाराधनायामभिनवकर्मप्रतिबन्धकारकत्वहेतुरपि ज्ञेयः।

आराधना हि ज्ञानक्रियात्मिका, तत्र क्रिया विरतिसंवरान्तर्गततयाऽऽगच्छत्कर्म प्रतिरुणद्धि, ज्ञानं च सम्यक्त्वसंवरान्तर्गततयाऽऽगच्छत्कर्मप्रतिरोधकं सदभ्यन्तरतपोंऽशतया सञ्चितकर्म क्षिणोति, तत उभाभ्यामनागतबन्धाभावात् प्राक्तनस्य च निश्शेषस्य परिक्षयाद्भवति योगिनो मोक्षप्राप्तिरित्यर्हत्तत्त्वश्रद्धानवता कुशलार्थिना मोक्षहेतुभूतकुशलानुबन्धमेव ज्ञानक्रियात्मकं कर्म यथा स्यात्तथा पर्युषणापर्वणि प्रयतितव्यमिति भावः।

साऽप्याराधना निराशंसभावेनैव कर्तव्या, तथैव महाफलत्वात्, श्रीशत्रुञ्जयादितीर्थयात्रावत्, न त्वैहिकपारत्रिकभोगफलेच्छया, तत्कृतस्य निदानरूपत्वेन निषिद्धत्वात्।

पर्युषणपर्वाराधनायामनुमानप्रमाणप्रदर्शनम्।

तदुक्तं—[1]"नो इहलोगट्ठयाए आयारमहिट्ठिज्जा, नो परलोगट्ठयाए आयारमहिट्ठिजा, नो कित्तिवन्नसद्दसिलोगट्ठयाए आयारमहिट्ठिज्जा, नन्नत्थ आरहंतेहिं हेऊहिं आयारमहिट्ठिज्जत्ति"।

आराधना निराशंसा कर्त्तव्येत्यधिकारः।

भवे भवे प्रभुचरणसेवाप्रार्थना तु शुभाशंसारूपत्वेन तत्कृतस्याऽनिदानरूपत्वेन नैव निषिद्धा शास्त्रे इति तत्र न विरोधः। एवं पर्युषणपर्व आराधनीयं सम्यक्त्वादिशुद्धिकारकत्वात्, प्रभुजन्मदीक्षादिक्षेत्रवत्। न च दृष्टान्तासिद्धिरिति वाच्यम्।

"[2]जम्मं दिक्खा नाणं, तित्थयराणं महाणुभावाणं। जत्थ य हुय निव्वाणं, आगाढं दंसणं होइ ॥ १ ॥" इति वचनात्। अथ भवोद्दामरागद्वेषप्रवाहप्रवाहिनामत एवाऽविश्रान्तानल्पदुःखसन्तप्तानां तद्दुःखपरिजिहीर्षया तत उद्धर्तुकामानां।

[3]"देवा वि देवलोए, दिव्वाभरणाणुरंजियसरीरा। जं परिवडंति तत्तो, तं दुक्खं दारुणं तेसिं ॥ १ ॥

[4]तं सुरविमाणविभवं, चिंतिय चयणं च देवलोगाओ। अइबलियं चिय जं न वि-फुट्टइ सयसक्करं हिययं ॥२॥"

---

१ नो इहलोकार्थाय आचारमधितिष्ठेत्, नो परलोकार्थाय आचारमधितिष्ठेत्, नो कीर्तिवर्णशब्दश्लोकार्थाय आचारमधितिष्ठेत्, नान्यत्राऽऽर्हतैर्हेतुभिराचारमधितिष्ठेत् ॥ २ जन्म दीक्षा ज्ञानं तीर्थकराणां महानुभावानाम्। यत्र च भूतं निर्वाणं आगाढं दर्शनं भवति ॥१॥

३ देवा अपि देवलोके, दिव्याभरणानुरञ्जितशरीराः। यत्परिपतन्ति तस्मात्, तद् दुःखं दारुणं तेषाम् ॥ १ ॥

४ तं सुरविमानविभवं चिन्तयित्वा च्यवनं च देवलोकात्। अतिबलीय एव यन्नापि स्फुटति शतशर्करं(शतखण्डं) हृदयम् ॥ २ ॥

[1]"ईसाविसायमयको-हमायलोहेहिं एवमाईहिं । देवा वि समभिभूआ, तेसिं कत्तो सुहं नाम ॥ ३ ॥"

इति सिद्धान्तोक्तेस्स्वर्गसुखमपि दारुणदुःखावहमिति तत्परमार्थदृष्ट्या दुःखरूपमेव, किं पुनः क्षणविनश्वरं तडिल्लताकल्पं नरसुखमिति मन्वानानां तद्दुःखविपक्षीभूतनिरुपाधिकाविचलाव्याबाधानन्तमोक्षसुखाभिलाषुकाणां यत् स्वात्मगृहं यावत्कालं गाढतराज्ञानान्धकारसमवगाढं बृहत्तराश्रवद्वारछिद्रद्वाराऽनादिकालीनानल्पकर्ममलभग्नविभग्नमभिनवकर्ममलागमनैकहेतुभूतनानाश्रववातायनजालकं तावत्कालं नाऽनन्तसुखास्पदमिति तच्छुद्ध्यर्थमज्ञानान्धकारविनिवारकप्रदीपदीपनकल्पसम्यग्ज्ञानस्य पूर्वसञ्चितकर्ममलशुद्धिकारकसम्मार्जनीमार्जनकल्पसम्यक्तपसश्चाऽभिनवकर्ममलप्रतिरोधकवातायनजालकपिधानकल्पसम्यक्संयमस्य च याऽऽराधना तदद्वितीयहेतुभूते श्रीपर्युषणापर्वणि समागते सति कज्जलगृहमिवाऽऽधिव्याधिसोपाधिस्थानं नाऽऽत्मवस्त्रशुद्धिकारकमित्यवगम्य तत्परित्यज्य शुभक्षेत्रमपि शुभात्मवीर्योल्लासे निमित्तमिति मत्वा धर्मैकधाम श्रीनन्दीश्वरतीर्थधाम शश्वत्सुषमास्थानं संभूय गत्वा श्रीतीर्थभक्तिभरोल्लसितान्तःकरणैर्देवेन्द्रैरष्टदिनावधि जलचन्दनपुष्पाद्यष्टद्रव्यैर्जिनबिम्बपूजनं जिनगुणस्तवनं गाननाटकादिकं च कृत्वा तद्यथाऽऽराध्यते तथा सुनिर्मलतरमनोवृत्तिकृदनल्पगुणावासं श्रीजिनमन्दिरं स्वयम्भूरमणसमुद्ररसस्पर्द्धिसमतारसैकनिकेतनाऽपूर्वसमाधिस्थानसुविहितमुनिसङ्घालङ्कृतोपाश्रयं च गत्वा विविधभक्त्याऽर्हद्धर्मानुरक्तैः श्रावकैरपि त्रिकरणयोगेनाराधनी-

---

१ ईर्ष्याविषादमदक्रोधमायालोभैः एवमादिभिः । देवा अपि समभिभूताः तेषां कुतस्सुखं नाम ॥ ३ ॥

यम् । मेढिबद्धोऽपि भ्राम्यन् यथा गौस्तृणग्रासं करोति तथा संसारोपाध्यतिव्याकुला अपि ये श्रावका येन केनचित्प्रकारेणैतत्पर्वाराधनां कुर्वन्ति तेषामेव जन्म सफलमित्यतोऽतिव्यग्रचित्तैरपि वीतरागप्रभुधर्म आराधनीय एवाऽत्र । उक्तञ्च–

"व्याकुलेनापि मनसा, धर्मः कार्योऽन्तरान्तरा । मेढिबद्धोऽपि हि भ्राम्यन्, घासग्रासं करोति गौः ॥१॥" इति,

अन्यथा तेषां जन्म निष्फलमेव, यतः पूर्वभवसञ्चितमहापुण्ययोगादवाप्तेऽप्यत्र पर्वणि प्रमादयोगेन धर्मसञ्चयमकुर्वन्तोऽहंकारिणो मूढात्मानः प्रौढपापकर्मवशंगता अजरामरमानित्वाद् यथेच्छं चेष्टां कुर्वन्तो लोहकारभस्त्रेव श्वसन्तोऽपि जीवाः किं जीवन्ति ? धर्मात्मकभावप्राणरहितत्वान्नैवेति भावः । उक्तञ्च–

"यस्य धर्मविहीनस्य, दिनान्याऽऽयान्ति यान्ति च । स लोहकारभस्त्रेव श्वसन्नपि न जीवति ॥ १ ॥" इति ।

ननु परमकल्याणालये सम्यग्दृष्टिनेत्रामृतलहरीरूपे अधःकृतचिन्तामणिकल्पद्रुमकामधेन्वादिकेऽनन्तज्ञानिभगवत्प्रोक्ते श्रीपर्युषणपर्वणि समागते कीदृग्गुणैः श्रावकैः किं स्वरूपाऽऽराधना कर्त्तव्येत्याशङ्कायामाह–

आवासराष्टकसुपौषधमग्नचित्तै–स्त्यक्ताश्रवैः प्रशमरुद्धकषायवर्गैः ।
श्रीकल्पसूत्रसविधिश्रवणैकतानै–राराधना जिनमतोन्नतिकाऽत्र कार्या ॥ १ ॥ इति ।

अथ प्रतिप्रभातं जाग्रता मया–

"गीतार्थसाधुचरणे स्वजनादिसङ्गं, त्यक्त्वा कदा वरचरित्रमहं ग्रहीष्ये ? ।
श्रीसूरिशासनवशंवद उग्रचर्या, साधोः कदाऽनिशमदोषवरां श्रयिष्ये ? ॥ १ ॥

देवैरिव श्राद्धैरप्येतत्पर्वाराधना कर्त्तव्यैवेत्युपदर्शनम् ।

इत्येवं सद्भावनां भावयताऽपि चारित्रमोहनीयकर्मोदयान्नैवाऽद्यावधि निरुपमशिवसुखप्रदं चक्रवर्त्तिसुखातिशायिसुखरूपं चारित्ररत्नं लब्धं, तथापि लोकत्रये रत्ननिधानमिव सारभूतमनन्तदुःखपरिमोचकमनन्तसुखदायकमिदं पर्युषणपर्वोपेक्ष्यायत्यनन्तदुःखप्रदं स्वल्पमचारु कामजं सुखं नैव सेवितुं युक्तं प्रभुशासनमन्दिरप्रवेशान्यथानुपपत्त्या भगवदनुगृहीतस्य मम, किन्तु भोगतृष्णालतारूपनिविडवनदहनेऽग्निवदुद्दाममहिमानमज्ञानरूपकमले हिमानीसंपातं विवेकं कृत्वा मयाऽष्टदिनावधि भोगतृष्णोच्छेद्यैवेतिभावनावासितान्तःकरणेन मुख्यवृत्त्याऽष्टदिनं यावन्मुनिहृदयकमलवर्त्तिस्वयंभूरमणसमुद्ररसस्पर्द्धिवर्द्धिष्णुसमतारसबिन्दोर्यथाकथञ्चिदनुभवार्थं गृहीतपौषधव्रतेन प्रतिश्रावकेण पर्युषणपर्व समाराधनीयम्।

अत्रानुमानप्रमाणमपि–पर्युषणपर्वसमाराधनं पौषधग्रहणपूर्वकं कर्त्तव्यं, तथैवात्मविशुद्धिवृद्धिभावेन महाकर्मनिर्जराकारकत्वात्, सौभाग्यपञ्चमीसमाराधनवदित्याशयेनाह, आवासराष्टकसुपौषधमग्नचित्तैरिति।

ननु नाऽधुना जीवपरिणाममान्द्यान्मोक्षो भवतीति तदभिलाषुकेणाऽपि तत्साधनीभूतसामायिकपौषधसंयमादिसम्यक्क्रिया नाऽधुनाऽऽदरणीया, इदानीं मोक्षानुत्पादकत्वात्, यन्न मोक्षोत्पादकं तन्नाऽऽदरणीयं धर्मार्थिना, सावद्यक्रियावदिति चेत्, तर्हि मत्यादिज्ञानमपि नैवेदानीं मोक्षोत्पादकमिति नैव तदप्यभ्यसनीयं स्यात्।

नन्विदानीं तदभ्यस्तमुत्तरोत्तरभवे सुगुर्वादियोगादभ्यस्यमानमन्ततः क्षायोपशमिकभावं परित्यज्य क्षायिकभावरूपेण परिणतं सत्तदेव परम्परया मोक्षोत्पादकं भवतीतीदानीमपि तदभ्यसनीयमेवेति चेत्, तत्तुल्यमत्राऽपि। तथा हि–

"[1]जं अब्भसेइ जीवो, गुणं च दोसं च एत्थ जम्मम्मि। तं पावइ परलोए, तेण य अब्भासजोएण ॥ १ ॥" इति सिद्धान्तोक्तेः, "अभ्यासाद्ध्यभ्यासोऽभिवर्द्धते" इति न्यायाच्च मोक्षानुकूलक्रियानुष्ठानं पूर्वपूर्वभवे अप्रमादानाशंसादिभावेन कृताभ्यासं दृढसंस्कारापन्नमुत्तरोत्तरभवे सुगुर्वादियोगात् पूर्वसंस्कारजागृतिभावेन तद्द्वाराऽऽशंसादिदोषरहितशुद्धतरशुद्धतमक्रियानुष्ठानप्राप्त्या प्रकर्षकाष्ठापन्नविशुद्धभावोत्पादनेन सर्वसंवरचारित्रं प्रापयत् तदेव परम्परया मोक्षरूपफलमुत्पादयतीति मत्वा कुशलानुबन्धिक्रियानुष्ठानमल्पसामर्थ्यवताऽपि

"[2]थोवं वि अणुट्ठाणं, आणपहाणं हणेइ पावभरं। लहुओ रविकरपसरो, दहदिसि तिमिरं पणासेइ ॥ १ ॥"

इत्याद्यर्हन्मतैकनिष्ठेनाऽऽदरणीयमेवेदानींतनकालेऽपि, न तु कालानुभावान्मोक्षफलानुत्पत्तावपि तत्राविश्वासं कृत्वाऽऽलस्यं विधेयम्, कदाचिच्छरीरमान्द्यादिकारणात्तदनाद्दतावपि न गुणवद्दोषः, तत्रापि स्वात्मानमधन्यंमन्यमानः पश्चात्तापं परकृतसुकृतानुमोदनञ्च कुर्यात् तदाऽपि तस्य महाकर्मनिर्जरा, यदि कोऽप्यऽपसिद्धान्तं ज्ञात्वाऽपि स्वप्रमादादिदोषाच्छादनाय धर्मिपुरुषभ्रामकवचो ब्रूयात्तदा महादोषः, स च श्रमणसङ्घेन श्रमणसङ्घबाह्यः कर्त्तव्य एव। तदुक्तं–

कालानुभावान्मोक्षानुत्पादेऽपि क्रिया कर्त्तव्यैवेत्यधिकारः।

---

१ यं अभ्यस्यति जीवो गुणं च दोषं चात्र जन्मनि। तं प्राप्नोति परलोके तेन चाभ्यासयोगेन ॥ १ ॥

२ स्तोकमप्यनुष्ठानमाज्ञाप्रधानं हन्ति पापभरम्। लघुको रविकरप्रसरो दशदिक्षु तिमिरं प्रणाशयति ॥ २ ॥

[1]"जो भणइ नत्थि धम्मो, न य सामइयं न चेव य वयाइं। सो समणसंघबज्झो, कायव्वो समणसंघेण ॥१॥" इति।

ननु मन्दोऽपि नैव प्रयोजनं विना प्रवर्त्तते, प्रवृत्तिं प्रतीष्टसाधनताज्ञानस्य कारणत्वादिति हेतोः पौषधानुकूलप्रवृत्तिहेतुभूतं किं तत्फलमिति चेत्, श्रूयतां सावधानीभूय शास्त्रोक्तं तत्फलम्–

[2]"पोसेइ सुहे भावे, असुहाइ खवेइ नत्थि संदेहो। छिंदइ नरयतिरियगइं, पोसहविहिअप्पमत्तेण ॥ १ ॥" इति

[3]"सामाइअपोसहसं-ठिअस्स जीवस्स जाइ जो कालो। सो सफलो बोद्धव्वो, सेसो संसारफलहेऊ ॥ १ ॥" इति।

अहोरात्रपौषधे देवायुर्बन्धलक्षणं फलश्चैवम्–

[4]"जइ पोसहिओ सहिओ, तवनियमगुणेहिं गमइ एगदिणं। ता बंधइ देवाउं, इत्तियमित्ताइं पलियाइं ॥१॥

[5]सगवीसं कोडिसया सत्तहुत्तरिकोडिलक्खसहस्सा य। सत्तसया सत्तहुत्तरी नव भागा सत्त पलियस्स ॥२॥" इति

अपसिद्धान्तवादिनः संघबाह्यत्वाधिकारः पौषधव्रतफलाधिकारश्च।

---

१ यो भणति नास्ति धर्मो न च सामायिकं न चैव च व्रतानि। स श्रमणसङ्घबाह्यः कर्त्तव्यः श्रमणसंघेन ॥ १ ॥

२ पोषयति शुभान् भावान्, अशुभान् क्षपयति नास्ति सन्देहः। छिनत्ति नरकतिर्यग्गतिं पौषधविधिरप्रमत्तेन ॥ १ ॥

३ सामायिकपौषधसंस्थितस्य जीवस्य याति यः कालः। स सफलो बोद्धव्यः, शेषः संसारफलहेतुः ॥ १ ॥

४ यदि पौषधिकः सहितस्तपोनियमगुणैर्गमयति एकदिनम्। तस्माद् बध्नाति देवायुः एतावन्मात्राणि पल्यानि ॥ १ ॥

५ सप्तविंशतिः कोटिशतानि सप्तसप्ततिः कोटिलक्षसहस्राणि च। सप्तशतानि सप्तसप्ततिर्नवभागाः सप्त पल्यस्य ॥ २ ॥

पौषधविधिं प्रदर्श्य तत्फलप्रदर्शनाधिकारः कतिपयदिनपौषधग्रहणेनाप्येतत्पर्वाराधना कर्त्तव्येत्यधिकारश्च ।

([1]सत्तत्तरिसत्तसया, सत्तहत्तरि सहस लक्ख कोडिओ । सगवीसं कोडिसया, नवभागा सत्तपलियस्स॥१॥)

२७७७.७७.७७.७७७ ७/९ । एतावत्पल्यायुर्बन्ध एकस्मिन् पौषधे, तत्र दिननिद्रागन्धमाल्यदन्तप्रक्षालनादिकमुत्सर्गतो नैव कुर्यात्, प्रत्युपेक्षणाप्रमार्जनादिसर्वमनुष्ठानमनुसमयमुपयोगपुरस्सरमेव कर्त्तव्यं, येनाऽसंख्यभवीयकर्म नश्येत्, तदुक्तम्–[2]"कम्ममसंखेज्जभवं, खवेइ अणुसमयमेव उवउत्तो" इति ।

दिवसे नैव निद्रां कुर्यात्, निशानिद्रामप्यल्पां कुर्यात्, यतोऽल्पनिद्रत्वं महानुभावलक्षणं । यदार्षे–

[3]"थोवाहारो थोवभणिओ अ जो होइ थोवनिद्दो अ । थोवोवहि उवगरणो तस्स हु देवा हि पणमंति ॥१॥"इति

अष्टदिनाऽवधिपौषधग्रहणाऽशक्तौ यथाशक्ति कतिपयदिनपौषधग्रहणेनापि महापर्वाराधनीयम् । अत्रानुमानञ्चैवम्–अत्र पौषधः श्रावकैरप्रमत्तभावेन कर्त्तव्य एव अशुभभावक्षयकारित्वे सति शुभभावपुष्टिकारित्वात्, नरकतिर्यग्गतिच्छेदकारित्वात्, विशिष्टदेवायुर्बन्धकारित्वाच्च, अष्टमादितपोवदिति । ननु मोहाविष्टचित्तानां मन्दपरिणामानां पौषधाशक्तौ तैस्तत्कथमाराधनीयमित्याशङ्कायामाह–त्यक्ताश्रवैरिति, कतिसंख्य

---

१ सप्तसप्ततिः सप्तशतानि, सप्तसप्ततिः सहस्राणि लक्षाणि कोटयः । सप्तविंशतिः कोटिशतानि, नव भागाः सप्त पल्यस्य ॥ १ ॥

२ कर्माऽसङ्ख्येयभवं क्षपयति अनुसमयमेवोपयुक्तः । इति

३ स्तोकाहारस्तोकभणितश्च यो भवति स्तोकनिद्रश्च । स्तोकोपध्युपकरणः तस्य (तं) खलु देवा हि प्रणमन्ति ॥ १ ॥

आश्रवः? किं च तल्लक्षणमिति चेत्, उच्यते, आश्रवति–प्रविशति कर्माऽऽत्मनि येन स आश्रवः, कर्मोपादान-हेतुः प्राणातिपातमृषावादादत्तादानमैथुनपरिग्रहभेदैः पञ्चसङ्ख्यकः, तत्र निर्लोभीभूयाऽष्टदिनावधि स्वयं परतश्च क्रियमाणहट्टादिपापव्यापारस्य निर्वाहाभावे च स्वयं हट्टाद्यारम्भस्य खण्डनपेषणवस्त्रक्षालनादेश्च–

[1]"एगग्गचित्ता जिणसासणम्मि, पभावणापूअपरायणा जे।
पव्वे न भुत्ते सचिअं (ठवियं) सुचित्तं, भवण्णवं गोयम! ते तरंति ॥ १ ॥"

इति सिद्धान्तोक्त्या महाफलं ज्ञात्वा सचित्ताहारसचित्तजलपानादेश्च प्रत्याख्यानं कृत्वा प्रथमाश्रवत्यागः कर्तव्यः, प्रत्याख्यानरज्जुना मनोऽश्वनिग्रहे सत्येवाऽऽश्रवद्वारनिवृत्तेर्महाफलत्वात्, तदुक्तम्–

[2]"पच्चक्खाणम्मि कए, आसवदाराइँ हुंति पिहियाइं। आसववुच्छेएणं, तण्हावुच्छेयणं होइ ॥ १ ॥"
[3]तण्हावुच्छेएणं, अउलोवसमो भवे मणुस्साणं। अउलोवसमेण पुणो, पच्चक्खाणं हवइ सुद्धं ॥ २ ॥
[4]पच्चक्खाणमिणं से–विऊण भावेण जिणवरुद्दिट्ठं। पत्ताऽणंता जीवा, सासयसोक्खं लहुं मोक्खं ॥३॥ इति।

---

१ एकाग्रचित्ता जिनशासने प्रभावनापूजापरायणा ये। पर्वणि न भुक्तवन्तः सचितं (स्थापितं) सुचित्तं भवार्णवं गौतम! ते तरन्ति ॥१॥
२ प्रत्याख्याने कृते आश्रवद्वाराणि भवन्ति पिहितानि। आश्रवव्युच्छेदेन तृष्णाव्युच्छेदनं भवति ॥ १ ॥
३ तृष्णाव्युच्छेदेनातुलोपशमो भवेत् मनुष्याणाम्। अतुलोपशमेन पुनः प्रत्याख्यानं भवति शुद्धम् ॥ २ ॥
४ प्रत्याख्यानमिदं सेवित्वा भावेन जिनवरोद्दिष्टम्। प्राप्ता अनन्ता जीवाः शाश्वतसौख्यं लघु मोक्षम् ॥ ३ ॥

आश्रवस्व-
रूपं तत्त्या-
गोपदेशश्च।

क्रूरसिंहकृष्णसर्पवत् प्रकृत्यैव प्राणातिपातानुष्ठायिनां धीवराणां तैलिकलोहकारभृष्टकर्मकारकादीनां चामोघवचनधनव्ययपुरस्सरमारम्भनिवारणेन देशनगरग्राममध्येऽमारिघोषणाकरणेन च जीवदया कलिकालसर्वज्ञश्रीहेमचन्द्रसूरिप्रतिबोधितश्रीपरमार्हतकुमारपालमहाराजवच्छ्रीहीरसूरीश्वरप्रतिबोधिताऽकब्बरपादशाहिवच्च सुखार्थिभिः पालयितव्या, यतस्सर्वधर्मस्य सारभूता जीवदयैवाऽविसंवादिनी, तदुक्तमन्यैरपि—

"श्रूयतां धर्मसर्वस्वं, श्रुत्वा चैवावधार्यताम्। आत्मनः प्रतिकूलानि, परेषां न समाचरेत् ॥१॥" इति, अनुमानञ्चात्र—जीवदया सुखार्थिभिरासेवनीया सुखहेतुत्वात्, यत्सुखहेतुभूतं तत्सुखार्थिभिरासेवनीयम्, यथाऽऽहारादिकं, सुखहेतुभूता च जीवदया तस्मात्सुखार्थिभिरासेवनीयेति। उक्तञ्च—"सर्वाणि सत्त्वानि सुखे रतानि, सर्वाणि दुःखाच्च समुद्विजन्ते। तस्मात्सुखार्थी सुखमेव दद्यात्, सुखप्रदाता लभते सुखानि" ॥१॥ इति।

देशनगरादावमारिघोषणाकारयितव्याऽत्रेत्यधिकारः।

अभयदानप्राधान्यख्यापनार्थं पञ्चराज्ञीदृष्टान्तमुच्यते—

आसीद्वसन्तपुरपत्तनभूमहेन्द्रो, नाम्नाऽरिपूर्वदमनो वरसद्गुणाढ्यः।
आसंस्तदीयदयिताः शुभशीलवत्यः, पञ्चाथ ताभिरसमं बुभुजे स सौख्यम् ॥ १ ॥
दीनान्धदुःखितजनेषु दयालवो ये, स्वल्पोऽपि यान् स्पृशति नैव मदो धनानाम्।
व्यग्रा भवन्ति सततञ्च परोपकारे, ये याचिताः परमतुष्टिमवाप्नुवन्ति ॥ २ ॥

नो यौवनोद्धतमदाहतसद्विचाराः, नो कोपवातपरिकम्पितधर्मवृक्षाः।
नो लोभतस्करपराहृतधैर्यवित्ताः, तैर्धार्यतेऽत्र धरणी कलिभारभुग्ना ॥ ३ ॥
इत्थं महर्षिवचनश्रवणाच्चतस्रो, भूपप्रिया हृदि परोपकृतिप्रतिज्ञाम्।
दध्रुस्तदैव च हृतान्यधनं तु चौरं, ता नीयमानमिह राजभटैरपश्यन् ॥ ४ ॥
ता राजकीयपुरुषैर्विदितापराधा, दृष्ट्वा स्थितं परिकरैस्सहितं गवाक्षे।
नम्रोक्तिवर्यविनयैस्स्वपतिं प्रसाद्य-कैकाहिकोपकृतिकं वरमापुराशु ॥ ५ ॥
एकैकवासरमनुक्रमतः सहस्रै-र्दीनारकैर्दशसहस्रमितैश्च लक्षैः।
तत्कोटिभिश्च बहुधा व्ययितैः स चौरः, सत्कारितो नरपतेः कृपयाऽऽशु ताभिः ॥ ६ ॥
"गोकाञ्चनक्षितितलादिकदानवीरा भूमौ लसन्ति पुरुषा बहुधाऽधुनापि।
आजीवमर्पयति योऽभयमङ्गिनां द्रा-गेकोऽपि दुर्लभतरः स नरः पृथिव्याम् ॥ ७ ॥
अन्यप्रदानजफलं क्षयमेति किञ्चि-दत्राप्यपूर्वसुरसौख्यफलं प्रदाय।
अक्षीणमोक्षफलमप्यऽभयप्रदानं, दत्ते जनेभ्य इति भो अभयं दद्ध्वम्" ॥ ८ ॥
या पञ्चमी नृपतिपत्न्यतिदुर्भगा सा, श्रुत्वोपदेशवचनं नृपतिं ययाचे।
चौराय चाऽभयवरं प्रवितीर्य तस्यै, तत्प्रार्थनाहतिभयेन स चाऽर्पि तेन ॥ ९ ॥

सामान्यभोज्यनिचयैः परितोष्य साऽऽख्यत्, त्वं मृत्युतोऽद्य मयका परिमोचितोऽसि ।
श्रुत्वेति पञ्चमवधूसुगिरं स चौर–आनन्दमाप नितरां प्रशशंस राज्ञीम् ॥ १० ॥
तासां मिथस्तदुपकारकृतौ विवादं, श्रुत्वा नृपस्तमथ चौरमपृच्छदेवम् ।
काभिः कृतोपकृतिराह स नम्रभावात्, वृत्तान्तमेतदवधानतया शृणु त्वम् ॥ ११ ॥
द्वात्रिंशदभ्यवहृतैः परिभोज्य पश्चात्, श्रेष्ठ्युत्तमाङ्गमसिना लघु कर्त्तनीयम् ।
इत्यन्त्यशासनवशंवदसैनिकास्ते, रक्तेक्षणा धृतशिरोऽसिलताश्च तस्थुः ॥ १२ ॥
सचामरैश्च प्रमदापरिवीज्यमानो, गीतोऽपि मागधजनैः परितस्तदानीम् ।
इभ्यः सुखं किमु लभेत मृगेन्द्रभीत–वातायुवन्मृतिभयान्न सुखं तदाऽऽप्तः ॥ १३ ॥
या पञ्चमी नृप ! वधूरभयप्रदान–माजीवनं प्रददती नवजन्म मह्यम् ।
साऽकारयत्तदिह भोजनतोऽविशेषात्, सौख्यं यदाप्नुवमदो वदितुं न शक्तः ॥ १४ ॥

अभयदान-प्राधान्य-ख्यापनार्थं पञ्चराज्ञी-दृष्टान्त-निरूपणम् ।

उक्तञ्च–“[1]सव्वे वि दुक्खभीरू, सव्वे वि सुहाहिलासिणो सत्ता। सव्वे वि जीवणरया, सव्वे मरणाओ बीहंति ॥ १ ॥
[2]वरमन्नभोगदाणं, धणधन्नहिरण्णरज्जदाणं वा । न कुणइ तं मणहरिसं, जायइ जं अभयदाणाओ ॥ २ ॥” इति

---

१ सर्वेऽपि दुःखभीरवः सर्वेऽपि सुखाभिलाषिणस्सत्त्वाः । सर्वेऽपि जीवनरतास्सर्वे मरणाद्बिभ्यति ॥ १ ॥
२ वरमन्नभोगदानं धनधान्यहिरण्यराज्यदानं वा । न करोति तं मनोहर्षं जायते योऽभयदानात् ॥ २ ॥

जीवाकुलत्वाज्जगतो हिंसाया दुर्निवारत्वात्कथमहिंसकत्वं साधूनामितिशङ्कोद्धारः।

बब्बूलकण्टकशिताग्रतलैकयूका, प्रोताद्धि साष्टशतवारमवाप मृत्युम्।
शूलाधिरोपणत एव नु गोपबालः, तत्पातकात्परभवेष्वतिदुःखमूलात्॥ १५॥
दृष्टान्तयुग्ममिति चित्तगृहे निवेश्य, भव्योऽभयार्पणविधौ यतते य एवम्।
तत्प्रौढपुण्यविभवात्सुरसौख्यमाप्य, शीघ्रं स शश्वदभयं पुरमेति मोक्षम्॥ १६॥

अथाञ्जनभृतसमुद्गकदृष्टान्तेन जीवाकुलत्वाज्जगतो हिंसाया दुर्निवारत्वात्कथमहिंसकत्वं साधूनाम्?, तथा चोक्तम् "जले जीवास्थले जीवा, आकाशे जीवमालिनि। जीवमालाकुले लोके, कथं भिक्षुरहिंसकः? ॥ १॥" इति चेत्, मैवम्, सदोपयुक्तस्य पिहिताश्रवद्वारस्य पञ्चसमितिसमितस्य त्रिगुप्तिगुप्तस्य सर्वथानिरवद्यानुष्ठायिनः कदाचिद्द्रव्यतः प्राणव्यपरोपणेऽपि हिंसापरिणामाभावादेवाऽहिंसकत्वात्, भावस्य विशुद्धत्वात्, प्रभुशासने हि शुभ आत्मपरिणाम एव कर्मनिर्जरकत्वेन मोक्षकारणम्, अशुभश्च कर्मबन्धकत्वेन संसारकारणम्,

तथाहि–भरतचक्रवर्त्ती स्त्र्यादिमोहालये निवसन्नप्यनित्यत्वादिद्वादशशुभभावनापरो गुणश्रेणिमारोहन् केवलज्ञानमासादितवान्, ब्रह्मदत्तचक्रवर्त्ती च लोभसमुद्रमग्नः क्लिष्टपरिणामपरिणतस्सप्तमनरकमासादितवान्, असंज्ञिनो महामत्स्यादयो योजनसहस्रप्रमाणशरीराः स्वयम्भूरमणमहासमुद्रमनवरतमालोड्यमानाः पूर्वकोट्यादिजीविनोऽनेकसत्त्वसंघातसंहारकारिणोऽपि रत्नप्रभापृथिव्यामेवोत्कर्षतः पल्योपमासंख्येयभागजीविषु चतुर्थप्रतरवर्तिनारकेषु जन्म लभन्ते, न परतः, तण्डुलमत्स्यस्त्वन्यजीवाघातकोऽपि निर्निमित्तमेवाऽतितीव्रतर-

॥८॥

रौद्रध्यानपरोऽन्तर्मुहूर्तमायुरनुपाल्य सप्तमनरकपृथिव्यां त्रयस्त्रिंशत्सागरोपमायुर्नारकतयोत्पद्यत इति। उक्तञ्च [1]"भोगे अभुंजमाणा वि, केइ मोहा पडंति अहरगइं" इति।

द्वितीयाऽऽश्रवद्वारपरित्यागे—

[2]"खीरं पि व हंसा जे, घुट्टंति केवलं समिद्धगुणे। दोसे विवज्जयंता, ते जाण सुजाणए पुरिसे ॥ १ ॥
[3]जइ इच्छह गुरुअत्तं, तिहुअणमज्झम्मि अप्पणो नियमा। ता सव्वपयत्तेणं, परदोसविवज्जणं कुणह ॥ २ ॥"

इति पारमर्षोक्तिमनुस्मरन् सर्वदैव परदोषान्नैव ब्रूयात्, पर्युषणायां तु विशेषतः, अप्रीतिकरं परेषां येन स्यात् शीघ्रं कुप्येद्वा परस्तन्न वचनं भाषेत, तदुक्तं—

[4]"अप्पत्तियं जेण सिया, आसु कुप्पिज्ज वा परो। सव्वसो न भासेज्जा, भासं अहियगामिणं ॥ १ ॥" इति।

स्वश्लाघायां परनिन्दायां च मूक एव स्यात् सततं सज्जनः, परगुणान्वेषणस्वदोषवीक्षणसज्जो भूत्वा परगुणपरमाणून् पर्वतीकृत्योल्लसेत्, परमाणुरूपानपि स्वदोषान् दृष्ट्वा स्वात्मानं निन्देत्, चित्तोद्वेगकारिणीं निष्ठुरां कर्कशां

द्वितीयाश्रवस्य निरूपणं तत्यागोपदेशश्च।

१ भोगान् अभुञ्जाना अपि केऽपि मोहात्पतन्ति अधोगतिम् ॥ १ ॥
२ क्षीरमिव हंसा ये पिबन्ति केवलं समृद्धगुणान्। दोषान् विवर्जयन्तस्तान् जानीहि सुज्ञायकान् पुरुषान् ॥ २ ॥
३ यदि इच्छत गुरुकत्वं त्रिभुवनमध्ये आत्मनो नियमात्। ततस्सर्वप्रयत्नेन परदोषविवर्जनं कुरुत ॥ ३ ॥
४ अप्रत्ययं येन स्यात् आशु कुप्येद् वा परः। सर्वशो न भाषेत भाषामहितगामिनीं ॥ ४ ॥

मर्मोद्घाटिनीं छेदनभेदनकरीं प्राण्युपतापोपद्रवोपघातकारिणीं मनसा पर्यालोच्य सत्यामपि सावद्यां भाषां नैव भाषेत। किं मृगाङ्कादिव सज्जनमुखचन्द्रात्सावद्यवचनाङ्गारः परहृदयदाही कदाप्यवपतेत्? नैवेति भावः।

तृतीयचतुर्थाश्रवनिरूपणं तत्त्यागोपदेशश्च।

तृतीयाश्रवपरित्यागे परादत्तधनग्रहणं न कर्त्तव्यं यावज्जीवं दुस्सहदुःखावहत्वात् परचक्षुर्निष्काशनवत्, उक्तश्च–

[1]"एक्कस्स चेव दुक्खं, हणिज्जमाणस्स हवइ खणमित्तं। जावज्जीवं दुसहं, सपुत्तपोत्तस्स धणहरणे ॥१॥" इति।

किं किमदत्तं न ग्राह्यमिति चेत्, तत्र–

"पतितं विस्मृतं नष्टं, स्थितं स्थापितमाहितम्। अदत्तं नाऽऽददीत स्वं, परकीयं क्वचित्सुधीः॥ १ ॥" इत्यादि॥

चतुर्थाश्रवपरित्यागे–

[2]जो देइ कणयकोडी, अहवा कारेइ कणयजिणभवणं। तस्स न तत्तिअ पुण्णं, जत्तिअ बम्भव्वए धरिए॥१॥

इति सिद्धान्तवचनाद् ब्रह्मचर्यस्याऽपूर्वफलं ज्ञात्वा प्रबलात्मवीर्योल्लासाङ्कुशेन मनोगजं वशीकृत्याबाल्यकालाद् यावज्जीवं ब्रह्मव्रतं विजयविजयादम्पतीवद् गृह्णीयात्, दृढशक्तिसंहननदीर्घायुरादिकारित्वात्, तदशक्तौ द्वात्रिंशद्वर्षावस्थायां ब्रह्मव्रतधारिश्रीपेथडमन्त्रिवद् योग्यावसरे ब्रह्मव्रतं गृह्णीयात्, तत्राप्यशक्तौ द्वितीयादि-



---

१ एकस्य चैव दुःखं हन्यमानस्य भवति क्षणमात्रं। यावज्जीवं दुस्सहं सपुत्रपौत्रस्य धनहरणे॥ ५॥

२ यो ददाति कनककोटिं अथवा कारयति कनकजिनभवनं। तस्य न तावत् पुण्यं यावद् ब्रह्मव्रते धृते॥ १॥

षट्पर्वचातुर्मासिकादिपर्वस्विव महामङ्गलकारिपर्युषणापर्वणि त्ववश्यं तत्स्वीकुर्यात्, परस्त्रीसेवनस्योभयलोकगर्ह्यत्वात्तत्त्यागस्तु श्रावकाणां स्यादेवेत्यत्र तु किं वक्तव्यम्। विजयविजयादम्पतीकथानकं चैवम्—

ब्रह्मचर्यविषये विजयान्वितविजयचरित्रप्ररूपणम्।

कौशाम्बिकायां सुसमृद्धपुर्यां–र्हद्दाससंज्ञो धनदस्त्वदाने।
सुश्राद्ध आसीज्जिनतत्त्वविज्ञो–ऽर्हद्दासिकाख्याऽस्य सुधर्मपत्नी॥ १॥
तयोस्तनूजो विजयाभिधान, आबाल्यकालादपि धर्मनिष्ठः।
स बाल्यकाले श्रुतवान् गुरुभ्यः, शीलोपदेशं भवरोगघातम्॥ २॥
सिंहो यथेभं वशतां विधत्ते, नाष्टापदं क्वापि महाबलिष्ठम्।
वश्यं विधत्ते विषयो विमूढं, धर्मैकनिष्ठं न तथाऽगधीरम्॥ ३॥
तेजोऽभिवृद्धिर्वरबुद्धिरायु–र्दीर्घं सदाऽऽरोग्यमपूर्वशक्तिः।
दासायते देवगणस्समृद्धि–र्ब्रह्मव्रतस्थस्य समीपसंस्था॥ ४॥
शिक्षावचोऽदः स निशम्य सम्यग्, ब्रह्मव्रतं शुक्लदले दधार।
तत्रैव पुर्यां जिनधर्मरक्तो, धनावहो नाम धनाढ्य आसीत्॥ ५॥
पत्नी धनश्रीरभवत्तदीया, कन्या तयोः श्रीविजया जिताक्षा।
जिनेन्द्रधर्मश्रवणैकतामा, जैनक्रियाऽपूर्वरसैकमग्ना॥ ६॥

माधुर्यरूपाः प्रथमं विपाके, कटुस्वरूपाः परितोऽपि मध्ये ।
किम्पाकतुल्याः क्षणसौख्यदाश्चा-न्तेऽनल्पदुःखैकखनिर्हि भोगाः ॥ ७ ॥
सद्धर्मरक्तेति मुनेर्निशम्य, ब्रह्मोपदेशं दृढसत्त्वशीला ।
ब्रह्मव्रतं कृष्णदलेऽग्रहीत्सा, तयोर्विवाहोऽजनि दैवयोगात् ॥ ८ ॥
तौ दंपती सम्मिलितौ रजन्यां, मिथो व्रतं तन्ननु बुद्धवन्तौ ।
जगाद नाथं विजयाऽतिहर्षाद्, यथेच्छमन्योपयमं कुरुध्वम् ॥ ९ ॥
धर्मैकमूर्त्तिर्विजयस्तदाऽवक्, हंसीव हंसोऽपि सदाऽस्ति मुक्ताम् ।
सुशीलमुक्तां त्वमिवाप्यहं वै, तथा रमे हंस्युपमे चरिष्ये ॥ १० ॥
कदापि दंष्ट्रीव न भोगविष्ठा-मत्स्यामि जन्माऽफलकं यतस्स्यात् ।
निश्चित्य चैवं ननु सर्वथैव, ब्रह्मव्रतं धारयतस्स्म नित्यम् ॥ ११ ॥
ज्ञाते पितृभ्यां नियतं हि दीक्षा, ग्राह्येति संधां कुरुतस्स्म तौ द्राक् ।
चम्पानगर्यां जिनदासनामा, श्रेष्ठी जिनेन्द्रागमबद्धनिष्ठः ॥ १२ ॥
चतुर्युताशीतिसहस्रसङ्ख्या, रङ्कस्य भाग्याद्यदि मे गृहं द्राक् ।
अभ्याव्रजेयुर्मुनयो विमुक्ति-मार्गाध्वनीना भवसिन्धुनावः ॥ १३ ॥

तदाच्छसद्भावनया ददेऽहं, चतुर्विधाहारमदोषमेभ्यः ।
स्याद् यत्प्रभावाद्विमलं स्वजन्मे-त्येवं स दध्यौ सुविशुद्धचित्तः ॥ १४ ॥ युग्मम्
अथैकदा तस्य पुरस्य भाग्यात्, श्रीकेवली श्रीविमलाभिधानः ।
भव्याब्जसूर्यस्समवासरत्स, तद्देशनां तां श्रुतवान् पवित्राम् ॥ १५ ॥
चतुर्युताशीतिसहस्रसङ्ख्या, रङ्कस्य मे वेश्मनि साधुवर्याः ।
विशुद्धभोज्यैः प्रतिलम्भनीया, एवं स्पृहा सेत्स्यति मे न वा किम्? ॥ १६ ॥
तत्पृष्ट इत्थं भगवानुवाच, नैवेति श्रुत्वा स विषादमाप ।
मनस्सरस्येव विलीनतां किं, यायात्स्पृहाबुद्बुद एष मे द्राक्? ॥ १७ ॥
मनोरथो मे फलदो न किं स्यात्, केनाप्युपायेन कदापि नाथ! ।
रङ्के मयीशाशु कृपां विधेहि, यतस्स्पृहासिद्धित उद्धृतिर्मे ॥ १८ ॥
संतप्तशान्त्येकपरायणोऽसौ, दयार्द्रचित्तो भगवान् जगौ तं ।
मा दैन्यभावं भज तेऽभिलाषो-ऽन्यस्मात्प्रकारात्तु फलिष्यतीति ॥ १९ ॥
कृताञ्जलिः श्रीभगवन्तमीशं, नत्वा पुनः केवलिनं जगौ सः ।
कोऽसौ प्रकारो भगवन्! कृपालो?, व्यावर्ण्यतां मत्पुरतोऽधुनैव ॥ २० ॥

ब्रह्मचर्य-विषये वि-जयान्वि-तविजय श्रेष्ठि-चरित्र-प्ररूपणम् ।

"चउरासीइसहस्सा–णमिसीण पारणेणं जं पुण्णं । तं किण्हसुक्कपक्खेसु, सीलप्पियकंतभत्तेण ॥ १ ॥"

स केवलीत्थं प्रणिगद्य तञ्च, सद्ब्रह्मचर्यव्रतशुद्धवृत्तेः ।
कुरुष्व भावाद् विजयान्वितस्य, भक्तिं विशुद्धां विजयस्य सिद्ध्यै ॥ २१ ॥
इत्यूचिवान् श्रीभगवान् तदैव, प्रमोदपुष्टो जिनदास इभ्यः ।
कौशाम्बिकाख्यां नगरीं च गत्वा, तौ दंपती पूजयति स्म भक्त्या ॥ २२ ॥ युग्मम् ।
युवाऽपि स श्रीविजयो विविक्ते, शय्याधिसुप्तो विजयासमेतः ।
जित्वा मनो भोगसुखैर्विरक्तो–ऽभूद्धन्यजन्मा भुवि पुण्यमूर्त्तिः ॥ २३ ॥
गुरूपदेशेन विजित्य मोहं, बाल्यात्तसुब्रह्मदृढप्रतिज्ञम् ।
यौ दम्पती पुत्रममुं सुवाते, नमोऽस्तु ताभ्यां शतशः पितृभ्याम् ॥ २४ ॥
पित्रोस्समीपं जिनदास एत्य, तयोश्चरित्रं प्रशशंस चेत्थम् ।
जगत्पवित्रं तनयस्य चित्रं, चरित्रमाकर्णयतस्स्म तौ च ॥ २५ ॥
सम्प्राप्तहर्षाश्रुचमत्कृतिस्सो–ऽनुमोदयामास पिता सदारः ।
वंशाम्बुधौ मे शरदिन्दुकल्पो, धन्योऽसि येनोज्ज्वलितं गृहं मे ॥ २६ ॥

१ चतुरशीतिसहस्राणामृषीणां पारणेन यत्पुण्यम् । तत्कृष्णशुक्लपक्षयोः शीलप्रियकान्तभक्तेन ॥ १ ॥

संमूढचित्ताज्ञनृवत्कदापि, न पुत्रसन्तानविनाशबुद्ध्या ।
हृदाऽनुतापं विदधे स मेने, स्ववंशरत्नं स्वजनुश्च धन्यम् ॥ २७ ॥
पूर्णप्रतिज्ञौ चतुरौ पितृभ्यां, पुण्यप्रपाभ्यामनुमोद्यमानौ ।
द्राग् दम्पती तौ सुगृहीतवन्तौ, दीक्षां भवाब्ध्युत्तरणैकनावम् ॥ २८ ॥
विशुद्धचारित्रबलेन लब्ध्वा, श्रीकेवलज्ञानमनेकसत्त्वान् ।
प्रबोध्य तौ मोक्षपुरीं विशुद्धां, प्रजग्मतुर्भाग्यवतां धुरीणौ ॥ २९ ॥

पद्यमयमेव गद्यरूपेण विजयविजयादम्पतीकथानकं चैवम्–बालबोधायोच्यते ।

कौशाम्ब्यामर्हद्दासार्हद्दास्योः पुत्रो विजयनामक आसीत्, स च बाल्यावस्थायां–
"विषयगणः कापुरुषं, करोति वशवर्तिनं न सत्पुरुषम् । बध्नाति मशकमेव हि, लूतातन्तुर्न मातङ्गम् ॥ १ ॥
अमराः किङ्करायन्ते, सिद्धयः सह सङ्गताः । समीपस्थायिनी सम्पत्, शीलालङ्कारशालिनाम् ॥ २ ॥"

इत्याद्युपदेशतः प्रबलवीर्योल्लासोत्साहतः शुक्लपक्षीयब्रह्मव्रतनियमं गृहीतवान्, तत्रैव च नगर्यां धनावह-धनश्रियोर्विजयानाम्नी पुत्री आसीत्, सा च–

"आदौ माधुर्यरूपाः परिणतिकटुका ये च किम्पाकतुल्याः,
कण्डूकण्डूयनाभाः क्षणिकसुखकरा दुःखसंयोजिनोऽन्ते ।

ब्रह्मचर्य-
विषये वि-
जयान्वि-
तविजय-
श्रेष्ठि-
चरित्र-
प्ररूपणम् ।

मध्याह्ने चैणतृष्णावदनृतमतिदा निष्फलायासमूलं,
भुक्ता दद्युः कुयोनिभ्रमणमपि महावैरिणस्तेऽत्र भोगाः ॥ १ ॥"

इत्याद्युपदेशं श्रुत्वा कृष्णपक्षीयब्रह्मव्रतनियमं गृहीतवती । तयोः कर्मसंयोगात् पाणिग्रहणं सञ्जातं, रजन्यां मिथस्संलापेन ज्ञातव्यतिकरौ तौ धर्मधैर्यं धृत्वा सर्वथा ब्रह्मव्रतं पालितवन्तौ 'मातापितृभ्यां च ज्ञाते वृत्तान्ते दीक्षा ग्रहीतव्येति' प्रतिज्ञां च गृहीतवन्तौ ।

अथ चम्पानगर्यां जिनदासश्रेष्ठी धर्मकर्मठ आसीत्, कदा मम रङ्कस्य गृहाङ्गणे चतुरशीतिसहस्रसाधव आगच्छेयुः, कदा च मुक्तिमार्गप्रस्थायिभ्यस्तेभ्योऽतुच्छभावनार्द्रहृदयोऽहं निरवद्याहारादिदानं ददामि, येन मे जन्म पावनं स्यादित्येवमेकदा तस्य मोक्षप्रासादसोपानभूतो मनोरथोऽभूत्, तदैव च तस्यां नगर्यां तस्य महाभाग्यवशाद् विमलनामा केवली भगवान् समवासरत्, तद्देशनां श्रुत्वा स चतुरशीतिसहस्राणि साधूनां मद्गृहे प्रतिलम्भनीयानीति मनोरथो मे पूर्णो भविष्यति नवेति पृच्छति स्म, केवली भगवान् नैवेति कथयति स्म, तदाऽतिसन्तप्तहृदयो गद्गदगिरा किं मे मनोरथबुद्बुदो निष्प्रयोजनो हृदयसरस्येव विनश्येत्? किं सफलो नैव भविष्यति? किं हतभाग्योऽहमित्येवं कल्याणालयं भगवन्तं स पृच्छति स्म, सन्तप्तस्वान्तसान्त्वनैकशीलः परमकारुणिकः केवली भगवानाह—मा दैन्यं भज, यतस्सेत्स्यति तव मनोरथः प्रकारान्तरेण, केवलिभगवन्तमानम्य पुनः पृच्छतिस्म कः स प्रकारः? इति, तदा केवली भगवान्—

"चउरासीइसहस्सा–णमिसीणं पारणेण जं पुण्णं। तं किण्हसुक्कपक्खेसु, सीलप्पियकंतभत्तेण ॥ १ ॥"[1]

इत्युक्त्या श्रीविजयविजयादम्पतीभक्तिकरणेन मनोरथपरिपूर्त्त्युपदेशं दत्तवान्, तच्छ्रुत्वा प्रमोदभरमेदुरो जिनदासः कौशाम्बीनगरीं गत्वा त्रिकरणयोगेनाऽपूर्वां भक्तिं विजयविजयादम्पत्योरकरोत्।

विजयमातापितृपार्श्वं गत्वा–

"संसारकज्जलगृहे विजयासुशय्या–संस्थोऽप्यहो ? सततभोगमलाऽविलिप्तः।
जित्वा मनस्तव सुतो विजयस्सुजन्मा, श्रेष्ठिन् ! भुवि त्वमत एव सुपुण्यमूर्तिः ॥ १ ॥
सर्वज्ञशंसितगुणस्सकलत्र आत्त–ब्रह्मव्रतोग्रनियमः सुत एष मातः !।
नाऽन्या प्रसूस्तदुपमं तनयं प्रसूता, तुभ्यं नमोऽस्तु भुवि धन्यतमे ! सुपुण्ये ! ॥ २ ॥"

इत्यादिप्रशंसां तयोश्चकार सः, तदा सहृदयहृदयचमत्कारकृत् पवित्रं स्वपुत्रचरित्रं श्रुत्वा मातापितरौ स्वपुत्रं सदारमनुमोदयामासतुः, न तु मोहाज्ञानाच्छादितविवेकनेत्रान्यनरवत् स्वपुत्रसन्तत्युच्छेदभयात् पश्चात्तापमकुरुताम्, किन्तु स्वकुलदीपकं पुत्ररत्नं सुधामधुरया दृष्ट्या दृष्ट्वा स्वात्मानौ धन्यतमावमन्येताम्, ततः परिपूर्णप्रतिज्ञाभ्यां ताभ्यां पित्रोराज्ञापुरस्सरं समहोत्सवं दीक्षां गृहीत्वा मोक्षनगरी समलङ्कृतेति।

---

१ चतुरशीतिसहस्राणामृषीणां पारणेन यत्पुण्यम्। तत्कृष्णशुक्लपक्षयोः शीलप्रियकान्तभक्तेन ॥ १ ॥

पञ्चमाश्रवपरित्यागे–

"सन्निधौ निधयस्तस्य, कामगव्यनुकारिणी । अमराः किङ्करायन्ते, सन्तोषो यस्य भूषणम् ॥ १ ॥"

इति सिद्धान्तावलम्बनेन गृहस्थैरसन्तोषदूषणं परिहृत्य श्रीपर्युषणायां परिग्रहसन्तोषभूषणेन स्ववपुरलङ्कर्तव्यं, न तु द्रव्यभूषणमात्रेण, भावभूषणं विना तस्य तनुभारभूतत्वेन निरर्थकत्वात्, ननु नैवाऽऽशाऽद्यावधि परिपूर्णा, तत्पूर्त्तावङ्गीकरिष्यामि सन्तोषभूषणमिति चेत्, मैवं वद, आशा ह्याकाशसमा विशाला, न तां कोऽपि प्रपूरयितुं समर्थः, लोभगर्त्तो हि यथा यथा पूर्यते तथा तथा महत्तरो भवति, तदुक्तम्–

[१]"सुवण्णरूप्पस्स उ पव्वया भवे, सिया हु केलाससमा असंखया ।
नरस्स लुद्धस्स न तेहि किंचि, इच्छा हु आगाससमा अणंतिया ॥ १ ॥
कसिणं पि जो इमं लो–यं पडिपुन्नं दलेज्ज एगस्स । तेणाऽवि से न संतुस्से, इइ दुप्पूरए इमे आया ॥२॥" इति ।

शरीरे जीर्णेऽपि नैवाऽऽशा केषाञ्चिज्जीर्णा, उक्तञ्च–

"शरीरं शीर्यते नाऽऽशा, गलत्यायुर्न पापधीः । मोहस्स्फुरति नाऽऽत्मार्थः, पश्य वृत्तं शरीरिणाम् ॥१॥" इति ।

---

१ सुवर्णरूप्यस्य तु पर्वता भवेयुः, स्यात् (कदाचित्) हुः कैलाससमा असङ्ख्यकाः ।
नरस्य लुब्धस्य न ते हि (तैः) किञ्चित्, इच्छा हुराऽऽकाशसमाऽनन्तिका ॥ १ ॥
कृत्स्नमपि य इमं लोकं प्रतिपूर्णं दद्यादेकस्मै । तेनाऽपि स न सन्तुष्येदिति संदुष्पूरकोऽयमात्मा ॥ २ ॥

पुनः कथम्भूतैः श्रावकैः। कलिकालेऽपि कल्पद्रुकल्पं पर्युषणपर्वाऽऽराधनीयमित्याशङ्कायामाह—

प्रशमरुद्धकषायवर्गैरिति,

[1]"जो चंदणेण बाहुं, आलिंपइ वासिणाऽवि तच्छेइ। संथुणइ जो अ निंदइ, महरिसिणो तत्थ समभावा॥१॥"

इत्येवं रागद्वेषाभावलक्षणेन प्रशमेन कषायनिरोधः कर्तव्यः।

[2]"तिव्वं पि पुव्वकोडी–कयं पि सुकयं मुहुत्तमित्तेणं। कोहग्गहिओ हणिउं, हहा! हवइ भवदुगे वि दुही॥१॥"

इत्येवममृतमयं प्रभुवचनं मनसि धृत्वा क्रोधादिकषायाणामुदय एव न स्यादित्येवं प्रशान्तवृत्त्या पूर्वमेव वर्तितव्यम्, अत्र कदाचित्केनचिन्निमित्तेन कषायोदयस्स्यात् तदा कषायसंलीनतायोगेन तद्विफलीकरणं कर्तव्यम्, उपशान्तकषायोऽप्यनन्तशः प्रतिपातं लभते किं पुनरन्य इति हेतोर्नैवाऽल्पेऽपि कषाये विश्वसितव्यम्। उक्तश्च—

समभाववृत्त्या कषायनिरोधः कर्त्तव्य इत्यधिकारः।

[3]"जइ उवसंतकसाओ, लहइ अणंतं पुणोऽवि पडिवायं। न हु भे वीससियव्वं, थेवेऽवि कसायसेसम्मि॥१॥

१ यश्चन्दनेन बाहुमालिम्पति वासिनाऽपि तक्ष्णोति। संस्तौति यश्च निन्दति महर्षयस्तत्र समभावाः॥ १॥

२ तीव्रमपि पूर्वकोटीकृतमपि सुकृतं मुहूर्त्तमात्रेण। क्रोधगृहीतो हत्वा हहा! भवति भवद्विकेऽपि दुःखी॥ १॥

३ यद्युपशान्तकषायो लभतेऽनन्तं पुनरपि प्रतिपातम्। न खलु भवद्भिर्विश्वसितव्यं स्तोकेऽपि कषायशेषे॥ १॥

[1]"अणथोवं वणथोवं, अग्गीथोवं कसायथोवं च। न हु भे वीससियव्वं, थेवं वि हु तं बहुं होइ ॥ २ ॥"
[2]"दासत्तं देइ अणं, अइरा मरणं वणो विसप्पंतो। सव्वस्स दाहमग्गी, दिंति कसाया भवमणंतं ॥३॥" इति।
परैराक्रुश्यमानोऽपि मनागपि मनसा न क्षोभमुपगच्छेत्, भावयेच्च तत्त्वमिदम्–
"आक्रुष्टेन मतिमता, तत्त्वार्थगवेषणे मतिः कार्या। यदि सत्यं कः कोपः?, स्यादनृतं किं नु कोपेन? ॥१॥" इति।
श्रीजिनोक्तक्रियानुष्ठाने प्रमादे सति परमकरुणानिधानैर्गुर्वादिभिः प्रेरितः सन् ममैवाऽयमसदनुष्ठायिनो दोष इति परमार्थं पर्यालोच्य नैव कुप्येत्, नाऽपि परुषं वदेत्, अपि तु करुणापात्रस्य ममाऽयं भगवतामनुग्रहः, यदेते निस्सीमानुपकृतपरोपकारैकरसिकास्तातपादाश्श्रीगुरवस्सम्यगनुशासयन्ति मां पुत्रमिव पितरः, मोहनिद्रासुप्तं मां प्रतिबोध्य श्रेयःकार्ये प्रेरकत्वेन परमबन्धवः। उक्तञ्च–
[3]"गेहम्मि अग्गिजाला–उलम्मि जह णाम डज्झमाणम्मि। जो बोहेइ सुयंतं, सो तस्स जणो परमबंधू ॥१॥
[4]जह वा विससंजुत्तं, भत्तं निद्धमिह भोत्तुकामस्स। जो वि सदोसं साहइ, सो तस्स जणो परमबंधू॥२॥" इति।

---

१ ऋणस्तोकं व्रणस्तोकमग्निस्तोकं कषायस्तोकञ्च। न खलु भवद्भिर्विश्वसितव्यं स्तोकमपि खलु तद्बहु भवति ॥ २ ॥
२ दासत्वं ददाति ऋणमचिरान्मरणं व्रणो विसर्पन्। सर्वस्य दाहमग्निर्ददते कषाया भवमनन्तम् ॥ ३ ॥
३ गृहेऽग्निज्वालाकुले यथा नाम दह्यमाने। यो बोधयति सुप्तं स तस्य जनः परमबन्धुः ॥ १ ॥
४ यथा वा विषसंयुक्तं भक्तं स्निग्धमिह भोक्तुकामस्य। योऽपि सदोषं साधयति (कथयति) स तस्य जनः परमबन्धुः ॥ २ ॥

स्तोकेऽपि कषायशेषे नैव विश्वसितव्य-मिति प्ररूपणम्। परैराक्रुश्यमाने सति क्रोधो न कर्त्तव्यः किन्तु तत्त्वविचारः कर्त्तव्य इत्युपदेशः। ॥ १४ ॥

परोऽपि क्रोधाग्निदीप्तो द्विषन्नपि नाऽयं शत्रुः, मत्पूर्वकृतकर्महनने सहायभूतः सन् मित्रमेवेति भावयद्भिः प्रशमामृतनिधानैरसौ क्षमयितव्यः, न तु स शत्रुं मत्वा हन्तव्यः, पूर्वकृतकर्महनने मित्रस्याऽपि शत्रूकृत्य हनने कषायशत्रुपुष्टिकरणेन तस्य मूर्खशिरोमणित्वं स्यात्, तदुक्तम्—

"मित्राणि प्राणिवर्गस्तु, यो द्विषन्नपि कर्महा। कामं क्षमयितव्योऽसौ, क्रुधा दीप्तः शमामृतैः ॥ १ ॥
कषायविषयान् शत्रून्, परिपुष्यन्ति मित्रवत्। सुहृदोऽसुमतः शत्रू-कृत्य निघ्नन्ति धिग् जडाः ॥२॥" इति। पुनः कथम्भूतैः श्रावकैः पापामयरसायनभूतपर्युषणाराधना कार्येत्यत आह—

श्रीकल्पसूत्रसविधिश्रवणैकतानैरिति, प्रथमदिनत्रयसत्काऽपूर्ववैराग्यदयादिरसपोषकश्रीपर्युषणपर्वाष्टाह्निकाव्याख्यानस्याऽनन्तार्थकसर्वसमीहितार्थप्रदायिकल्पद्रुकल्पश्रीकल्पसूत्रस्य चाऽऽत्मगतं हृदयशोषादिश्रममविगणय्य कृच्छ्रेणाऽप्येते जीवाः प्रतिबुध्यन्तां दुःखाच्च मुच्यन्तामित्यनुग्रहबुद्ध्या प्रतिक्षणं परार्थकरणप्रवर्द्धमानमहाशयेन यथा यथा परेषामुपकारो भवति तथा तथा श्रेयोमार्गेऽभ्युद्यतेन कृतयोगेन महामुनिना भव्यात्मनां संवेगनिर्वेदादिलोकोत्तरगुणवृद्धिर्यथा स्यात्तथा वाच्यमानस्य चित्तैकाग्र्याञ्जलिप्रग्रहपूजाप्रभावनादिविधिना विकथाचतुष्टयनिद्राद्यविधिपरिहारेण च श्रवणैकतानैः श्रीवज्रस्वामिवच्छासनोन्नतिविधायिनी श्रीपर्युषणाराधना कार्या।

द्विषन्नपि परः कर्महनने सहायभूतस्सन् मित्रमेवेति भावनाऽधिकारः।

श्रीकल्पसूत्रश्रवणश्रावणविधिनिरूपणम्

श्रीकल्पसूत्रश्रवणफलप्रतिपादनम् ।

श्रीकल्पसूत्रवाचनाऽऽरम्भात्पूर्वदिवसे समहोत्सवं श्रीकल्पसूत्रं स्वगृहे नीत्वा तत्र धर्मजागरिकां कृत्वा वाचनाऽऽदिवसे च विविधमहोत्सवैः सकलसङ्घेन सहोपाश्रयमागत्य श्रीगुरुभगवद्धस्ते समर्प्य वासकस्तूरीकर्पूरै-र्धूपदीपैश्च प्रपूज्य श्रीकल्पसूत्रमाकर्णनीयमिति । अथ तत्र श्रीकल्पसूत्रश्रवणे किं फलमिति चेत्, उच्यते–

"कल्पोऽकल्प्यसुभावकृत्कलिमलप्रध्वंसबद्धादरः, कल्पस्सर्वसमीहितोदयविधौ कल्पद्रुकल्पः कलौ ।
ये कल्पं परिवाचयन्ति भविकाश्शृण्वन्ति ये चाऽऽदरात्, ते कल्पेषु विहृत्य मुक्तिवनितोत्सङ्गे सदा शेरते ॥१॥"

"दानैस्तपोभिर्विविधैः, सत्तीर्थोपासनैरहो ! । यत्पापं क्षीयते जन्तो–स्तत्पापं श्रवणेन वै ॥ २ ॥" इति ।

अथाऽनन्तदुःखापहे श्रीपर्युषणापर्वणि कर्तव्यान्तरमाह–

सार्द्धं कृपालुगुरुणा भवतारकेण, कार्यं प्रतिक्रमणमात्मविशुद्धिकारि ।
कालद्वयं जिनवरोक्तशुभाशयेन, नित्यं प्रमादपरिहारत आर्हतेन ॥ २ ॥

प्रतिक्रमणस्य नित्यं गुरुणा सह करणे विशिष्टफलप्रदर्शनम् । ॥ १५ ॥

ननु प्रतिक्रमणं गुरुणा सह कर्तव्यमित्यत्र किं मानं कश्च लाभ इति चेत्, शृणु–

[1]"पंचविहायारविसु–द्धिहेउमिह साहु सावगो वाऽवि । पडिक्कमणं सह गुरुणा, गुरुविरहे कुणइ इक्कोऽवि ॥१॥"

इति सिद्धान्ताद्गुरुसद्भावे तेनैव सार्द्धं पञ्चविधाचारविशुद्ध्यर्थं प्रतिक्रमणं प्रतिदिनं कर्तव्यं, तथाकरणे

१ पञ्चविधाचारविशुद्धिहेतोरिह साधुः श्रावको वाऽपि । प्रतिक्रमणं सह गुरुणा गुरुविरहे करोत्येकोऽपि ॥ १ ॥

स्मारणा–प्रमादपरिहारणादिद्वारा क्रियाविशुद्ध्या भावविशुद्धिः, गुरुमुखसूत्रपाठश्रवणोद्भूतशुभभावाद्विशेषतः कर्मक्षयोपशमः। "गुरुसक्खिओ हु धम्मो" इति जिनाज्ञाराधनञ्च। ननु प्रतिक्रमणमित्यस्य कोऽर्थ इति चेत्, उच्यते—

"स्वस्थानाद्यत्परं स्थानं, प्रमादस्य वशाद्गतः। तत्रैव क्रमणं भूयः, प्रतिक्रमणमुच्यते ॥ १ ॥" इति।

प्रवचनसारोद्धारवृत्तिपद्येन तल्लक्षणं जानीहि। षडावश्यकफलञ्चैवम्–

"[1]आवस्सयमुभयकालं,ओसहमिव जे कुणंति उज्जुत्ता। जिणविज्जकहियविहिणा,अकम्मरोगा य ते हुंति॥१॥"इति।

अनुमानमुद्रा चैवम्–

प्रतिक्रमणक्रिया उभयकालमवश्यं कर्तव्या, सर्वथा रोगनिवृत्तिकारित्वे सत्यात्मस्वास्थ्यकारित्वाद्, या या क्रिया सर्वथा रोगनिवृत्तिकारित्वे सत्यात्मस्वास्थ्यकर्त्री सा सोभयकालमवश्यं कर्तव्या यथौषधपानक्रिया, तथा चेयम्, तस्मात्तथेति पर्यवसितम्।

न चाऽत्र प्रतिक्रमणमात्रेण सन्तोषितव्यं किन्त्वनेकशः प्रतिदिनं सामायिकमपि कर्तव्यमित्याशयेनाऽऽह–

सामायिकं च समभावमरौ च मित्रे, निश्शेषकर्मविषमुक्त्यहिमन्त्रकल्पम्।
सावद्ययोगपरिहारदृढप्रतिज्ञं, कार्यं त्रिधा परशुचन्दनकल्पवृत्त्या ॥ ३ ॥

प्रतिक्रमणशब्दार्थस्य तत्फलस्य च निरूपणम्। प्रतिक्रमणक्रियायाः कर्त्तव्यत्वेऽनुमानप्रमाणप्रदर्शनञ्च। सामायिकनिरूपणं तत्कर्त्तव्यतोपदेशः तत्फलप्ररूपणञ्च।

---

१ आवश्यकमुभयकालमौषधमिव ये कुर्वन्त्युद्युक्ताः। जिनवैद्यकथितविधिनाऽकर्मरोगाश्च ते भवन्ति ॥ १ ॥

विशुद्धभावेनाऽभिलाषुकाणां देवानामपि चारित्रमोहनीयकर्मोदयात्सामायिकदुर्लभता शास्त्रे गीयते, उक्तञ्च-
[1]"सामाइयसामग्गिं, देवा वि चिंतंति हिययमज्झम्मि। जइ हुज्ज मुहुत्तमेगं, ता अम्ह देवत्तणं सहलं ॥१॥" इति।

अत्राऽनुमानञ्चैवम्-सामायिकं वासिचन्दनकल्पवृत्त्या प्रतिदिनमाचरणीयं निश्शेषविषोत्तारकत्वात्, सर्पादिमन्त्रवत्, देवानामपि दुर्लभत्वात्, तपोवच्चेति। तस्य फलञ्चेदं शास्त्रे प्रोक्तम्-

[2]"सामाइयं कुणंतो, समभावं सावओ घडियदुगं। आउं सुरेसु बंधइ, इत्तियमित्ताइं पलिआइं ॥ १ ॥
[3]बाणवई कोडीओ, लक्खा गुणसट्ठि सहस्स पणवीसा। नवसयपणवीसजुआ, सतिहा अडभागपलियस्स ॥३॥"

९२५९२५९२५$\frac{३}{८}$($\frac{७}{८}$) इति।

[4]"दिवसे दिवसे लक्खं, देइ सुवण्णस्स खंडियं एगो। एगो पुण सामइयं, करेइ न पहुप्पए तस्स ॥ २ ॥

ननु प्रतिक्रमणं सामायिकं वा तत्सूत्रार्थज्ञानतन्मननमन्तरेण क्रियमाणं नैव फलावहमिति चेत्, मैवं वद, तत्सूत्रस्य मन्त्ररूपत्वेनाऽज्ञातार्थस्याऽहिमन्त्रवच्छब्दमाहात्म्यादेव कर्मविषमोचकत्वात्, किञ्चाऽज्ञातगुणोऽप्यग्निः

अज्ञातार्थं प्रतिक्रमणं क्रियमाणं नैव फलावहमितिशङ्कोद्धारः।

---

१ सामायिकसामग्रीं देवा अपि चिन्तयन्ति हृदयमध्ये। यदि भवेन्मुहूर्त्तमेकं ततोऽस्माकं देवत्वं सफलम् ॥ १ ॥
२ सामायिकं कुर्वन् समभावं श्रावको घटिकाद्वयम्। आयुः सुरेषु बध्नाति एतावन्मात्राणि पल्यानि ॥ २ ॥
३ द्वानवतिः कोट्यो लक्षाण्येकोनषष्टिः सहस्राणि पञ्चविंशतिः। नवशतानि पञ्चविंशतियुतानि सत्रिधा(सप्तभागाः)अष्टभागपल्यस्य॥३॥
४ दिवसे दिवसे लक्षं, ददाति सुवर्णस्य खाण्डिकमेकः। एकः पुनस्सामायिकं, करोति न प्रभवति तस्य ॥ ४ ॥

प्रत्यासन्नो बालस्य शीतं व्यपनयति तद्वद्भावाग्निरूपं प्रतिक्रमणं सामायिकञ्चाऽज्ञातार्थमविज्ञातगुणमपि भावात्मकं कर्मशैत्यं यतो व्यपनयति, तदेव हंसदृष्टान्तेन वन्दारुवृत्तौ निष्टङ्कितं, तथाहि–

"एकस्मिन् सन्निवेशेऽभूत्, स्थविरैका सुदुर्गता। हंसो नाम सुतस्तस्या, वत्सरूपाण्यचारयत्॥ १॥
सोऽन्यदा बहिरुद्यानात्, सायमायन् गृहं प्रति। दष्टो रुष्टेन दुष्टेन, दन्दशूकेन निष्ठुरम्॥ २॥
तत्क्षणाद्विषवेगेन, सर्वाङ्गमपि भावितः। पपात मूर्च्छितो भूम्यां, काष्ठवन्नष्टचेतनः॥ ३॥
केनाऽपि तज्जनन्यास्तत्, कथितं साऽपि सत्वरम्। मान्त्रिकान् मेलयित्वाऽगात्, पूत्कुर्वन्ती सुतान्तिकम्॥४॥
मृतोऽयमिति मन्वाना–स्ते सर्वेऽगुर्यथागतम्। एकाकिन्यपि सा रात्रौ, तत्राऽस्थाच्छोकसङ्कुला॥ ५॥
कर्णमूले स्थिता तत्र, रुदत्युच्चैस्स्वरेण सा। हा! पुत्र! हंस! हंसेति, वृद्धाऽश्रान्तमवोचत॥ ६॥
तस्या एवं रुदन्त्यास्सा, कथञ्चन निशाऽगमत्। सुप्तवत्सहसोत्तस्थौ, हंसो हंसोदये ततः॥ ७॥
सञ्जीभूतं च तं ज्ञात्वा, मान्त्रिकाः पुनरागताः। अपृच्छन्नस्य किं चक्रे?, त्वया वृद्धे! चिकित्सितम्॥ ८॥
साऽप्यूचे हंस! हंसेति, वदन्ती स्थितवत्यहम्। तेऽप्यूचुर्गारुडे मन्त्रे–ऽमूनि बीजाक्षराणि भोः!॥ ९॥
तदर्थमविदन्त्याऽपि, जरत्या कर्णजापतः। स्वपुत्रो निर्विषीचक्रे, प्रभावो ह्यक्षरेष्वहो?॥ १०॥" इति।

पुनः श्रीपर्युषणापर्वण्यन्यत्किं कर्तव्यमित्याशङ्कायामाह–

अज्ञातार्थगुणोऽपि मन्त्रो विषघ्न इत्यत्र हंसदृष्टान्तः।

सर्वैरथाऽऽब्दिकप्रतिक्रमणे विधेया, सत्क्षामणाकरणतो मिथ आत्मशुद्धिः ।
मिथ्याऽस्तु पूर्वकृतदुष्कृतमत्र सर्वं, द्राक्म्ये शिवैकमनसेति विभावनीयम् ॥ ४ ॥

सांवत्सरिकप्रतिक्रमणे पुनरकरणवृत्त्या न तु कुम्भकारवृत्तिसदृशवृत्त्या द्रव्यतोऽञ्जल्यादियोजनेन भावतो निश्शल्यादिभावेन मिथ्यादुष्कृतदानेन सकलसङ्घैर्मिथस्स्वापराधक्षामणा कर्त्तव्या । तस्याः किं फलमिति चेत्, उच्यते-प्रवरात्मशुद्धिराराधकभावश्चेति । अनुमानश्चात्र सांवत्सरिकप्रतिक्रमणे मिथःक्षामणा निश्शल्यादिभावेन कर्त्तव्या प्रवरात्मशुद्धिकारकत्वात्, आराधकभावजनकत्वाच्च सम्यक्तपोवत् । तथाहि–

यो भवभीरुर्विशुद्धात्मपरिणत्या स्वापराधिनमक्षान्तमपि क्षमयति स आराधक उदयननृपवत् ।

यश्च क्रोधादिदुष्टात्मपरिणत्याऽपराधिनमुपशान्तमपि न क्षमयति स विराधकश्चण्डप्रद्योतनृपवत् । उक्तञ्च–

[1]"जो उवसमइ तस्स अत्थि आराहणा, जो उ न उवसमइ तस्स नत्थि आराहणा, तम्हा अप्पणा चेव उवसमियव्वं, से किमाहु भंते ? उवसमसारं खु सामन्नं" इति ।

अथ [2]"मित्ति मिउमद्दवत्ते, छत्ति य दोसाण छायणे होइ । मित्ति य मेराइठिओ, दुत्ति दुगुंछामि अप्पाणं ॥१॥
क्कत्ति कडं मे पावं, डत्ति य डेवेमि तं उवसमेणं ।"

---

१ य उपशमयति तस्याऽस्त्याराधना, यस्तु नोपशमयति तस्य नाऽस्त्याराधना, तस्मादात्मना चैवोपशमयितव्यं, तत्किमर्थं भदन्त ? उपशमसारं खलु श्रामण्यम् । २ मीति मृदुमार्दवत्वे, छेति च दोषाणां छादने भवति । मीति च मर्यादायां स्थितो द्विति जुगुप्साम्यात्मानम् ॥१॥
क्केति कृतं मे (मया) पापं, डेति च डेवेमि तदुपशमेन ।

"मित्ति कायभावनम्रतारूपमृदुत्वमार्दवत्वे, छत्ति असंयमदोषच्छादने, मित्ति चारित्रमर्यादायां स्थितः, दुत्ति जुगुप्सामि दुष्कृतकर्मकारिणमात्मानम्, कत्ति कृतं मया पापं, डत्ति डेवेमि–लुम्पयामि तदुपशमेन"।

इत्येवं 'मिच्छामि दुक्कडं'पदाक्षरार्थ इति हेतोः कृतपाप एवाऽपराधी मिथ्यादुष्कृतं दद्यात्, नाऽहं तथा, शुद्ध एवाऽहमिति किमर्थं मिथ्यादुष्कृतं ददामीत्येवं द्वयोर्मध्ये यद्येकोऽपराध्यपि ब्रूयात्तदा स द्विगुणं पापं करोति, स्वस्य बालत्वं च प्रकाशयति, मृषाभाषणेन स्वात्मानमनन्तसंसारकान्तारमनुवर्त्तयति च। उक्तञ्च–

[1]"पावं काऊण सयं, अप्पाणं सुद्धमेव वाहरइ। दुगुणं करेइ पावं, बीयं बालस्स मंदत्तं ॥ १ ॥" इति।

भावतो मिथः क्षामणं ह्यनपराधिनोऽपि तृतीयौषधवत् पुष्टिकार्येव, तत्रोदयनराजदृष्टान्तश्चाऽयम्–

भावतः क्षमयितुरेवाऽऽराधकत्वं नान्यस्येत्यत्रोदयनचण्डप्रद्योत नृपदृष्टान्तः

सिन्धुसौवीरदेशाधिपतिर्दशमुकुटबद्धभूपसेव्य उदयनराजो विद्युन्मालिसमर्पितश्रीवीरप्रतिमार्चनाप्रभावनिरोगीभूतगन्धारश्राद्धार्पितगुटिकाभक्षणतो जाताद्भुतरूपायाः सुवर्णगुलिकाया देवाधिदेवप्रतिमायुताया अपहर्तारं मालवदेशभूपं चतुर्दशभूपसेव्यं चण्डप्रद्योतराजं देवाधिदेवप्रतिमाप्रत्यानयनोत्पन्नसङ्ग्रामे बद्ध्वा पश्चादागच्छन् दशपुरे वर्षासु तस्थौ, वार्षिकपर्वणि च स्वयमुपवासं चक्रे, भूपादिष्टसूपकारेण भोजनार्थं पृष्टेन चण्डप्रद्योतेन विषभिया श्राद्धस्य ममाऽप्यद्योपवास इति प्रोक्ते धूर्तसाधर्मिकेऽप्यस्मिन्नक्षमिते मम प्रतिक्रमणं न शुध्यतीति तत्सर्वप्रदानतस्तद्भाले 'मम दासीपतिः' इत्यक्षराच्छादनाय स्वर्णपट्टदानतश्च श्रीउदयनराजेन

१ पापं कृत्वा स्वयमात्मानं शुद्धमेव व्याहरति। द्विगुणं करोति पापं द्वितीयं बालस्य मन्दत्वम् ॥ १ ॥

चण्डप्रद्योतः क्षमितः। अत्र श्रीउदयनराजस्यैवाऽऽराधकत्वं, तस्यैवोपशान्तत्वात्, न तु चण्डप्रद्योतस्य, तस्याऽनुपशान्तत्वात्, क्वचिच्चोभयोरप्याराधकत्वं, चन्दनबालामृगावतीवत्, तथाहि–

उभयाराधकत्वे चन्दनबालामृगावती दृष्टान्तः।

"एकदा श्रीमहावीरः, कौशाम्ब्यां समवासरत्। वन्दितुं तत्र चन्द्राकौं, सविमानौ समीयतुः ॥ १ ॥
तथापि चन्दना ज्ञात्वा, दक्षाऽस्तसमयं ततः। निर्गत्याऽगान्निजस्थाने, तत्रैवाऽस्थान्मृगावती ॥ २ ॥
स्वस्थानं गतयोश्चन्द्र–सूर्ययोरथ विस्तृते। तमस्यागाद्द्रुतं भीता, सा साध्वीनां प्रतिश्रये ॥ ३ ॥
तत्रेर्यापथिकीं साऽथ, प्रतिक्रम्य प्रवर्तिनीम्। शयनस्थां प्रणम्योचे, मन्तुर्मे क्षम्यतामयम् ॥ ४ ॥
चन्दना चन्दनाभाभि–र्वाणीभिस्तामथाऽभ्यधात्। भद्रे! भद्रकुलोत्पन्ने!, किं ते साम्प्रतमीदृशम्? ॥ ५ ॥
साऽप्यूचे मयकाऽपायं, कृतं दुष्कृतमेतकम्। करिष्ये नेदृशं भूय, इत्युक्त्वा न्यपतत्पदोः ॥ ६ ॥
निद्राऽथाऽगात्प्रवर्तिन्या, मृगावत्यास्तु भावतः। मिथ्यादुष्कृतकारिण्या, जज्ञे केवलमुज्ज्वलम् ॥ ७ ॥
सर्पव्यतिकरेण च, प्रबुद्धा चन्दना तदा। अवाप केवलं ज्ञानं, क्षमयन्ती मृगावतीम् ॥ ८ ॥

किञ्चाऽन्यत्कर्तव्यमत्रेति जिज्ञासायामाह–

जिनस्नात्राधिकारः।

स्नात्रं वरप्रशमकृद्द्रवभिज्जिनानां, माङ्गल्यकृत्सुरगिरौ सुरवद्विधाय।
अङ्गाग्रभावविभिदा प्रवरा जिनार्चा, स्वर्गापवर्गजननी विधिना विधेया ॥ ५ ॥ इति।

प्रथमं तावत् कुङ्कुमकर्पूरश्रीखण्डाद्युन्मिश्रेण सुगन्धिजलेन त्रिभुवनगुरोस्स्नात्रं कुर्यात्, उक्तञ्च–

[1]"घुसिणकप्पूरमीसं तु, काउं गंधोदगं वरं। तओ भुवणनाहस्स, ण्हवेइ भत्तिसंजुओ ॥ १ ॥" इति।

तदानीं च–

[2]"बालत्तणम्मि सामिय!, सुमेरुसिहरम्मि कणयकलसेहिं। तियसासुरेहिँ ण्हविओ, ते धन्ना जेहिँ दिट्ठोऽसि ॥१॥"

मेरुशृङ्गे च यत्स्नात्रं, जगद्भर्तुस्सुरैः कृतम्। बभूव तदिहास्त्वेत–दस्मत्करनिषेकतः ॥ २ ॥"

इत्यादि भावनीयम्।

तदनन्तरं [3]"पुप्फक्खयथुईहिं तिविहा पूया मुणेयव्वा" इति सिद्धान्तोक्तेरङ्गादिभेदत्रयवती पूजा कार्या। तत्र चन्दनकेशरगोरोचनकस्तूरीपुष्पमनोहराभूषणादिभिरङ्गपूजा १, अक्षतधूपदीपनैवेद्यादिभिरग्रपूजा २, अपूर्वस्तोत्रचैत्यवन्दनादिभिश्च भावपूजा ३, कार्या।

अङ्गाग्रभावपूजाविधानम्।

अथ "प्रसन्नो हि फलप्रदः" इति प्रत्यक्षसिद्धं, न च जिनबिम्बं जडरूपत्वेन प्रसन्नमिति न फलप्रदं, तथा च जिनबिम्बार्चनं न कर्तव्यं निष्फलत्वाज्जलताडनवदिति चेत्, मैवं; जडरूपस्याऽपि चिन्तामणिरत्नदक्षिणावर्त्त-शङ्खादेर्भक्त्या सविधिपूजने फलजननश्रवणेन हेत्वसिद्धेः, तदुक्तम्–

जिनप्रतिमाऽनभ्युपगन्तॄणां मतं प्रदर्श्य तन्मतखण्डनम्

---

१ घुसृणकर्पूरमिश्रं तु कृत्वा गन्धोदकं वरम्। ततो भुवननाथस्य(नाथं) स्नपयति भक्तिसंयुतः ॥ १ ॥

२ बालत्वे स्वामिन्! सुमेरुशिखरे कनककलशैः। त्रिदशासुरैस्स्नपितस्ते धन्या यैर्दृष्टोऽसि ॥ १ ॥

३ पुष्पाक्षतस्तुतिभिस्त्रिविधा पूजा मन्तव्या।

"अप्रसन्नात्कथं प्राप्यं, फलमेतदसङ्गतम् ?। चिन्तामण्यादयः किं न, फलन्त्यपि विचेतनाः ? ॥ १ ॥" इति।

तथा च जिनप्रतिमा फलप्रदा सविधिपूजने प्रशस्तसमाधिचित्तोत्पादकत्वादर्हन्निव चिन्तामण्यादिवद्वा, जिनप्रतिमार्चनं कर्तव्यं, कर्तुर्मनःप्रसत्त्या कर्मक्षयोपशमादिफलजनकत्वात्, तप आदिवदिति मन्तव्यम्।

नन्वेवं तर्हि केषाञ्चिद्भगवत्पूजातोऽप्यहितप्राप्तिरिति कथमिति चेत्, तत्र तत्कृताविधिरेव कारणं न तु भगवान्, तथाहि–अग्निमविधिनाऽऽसेवमानस्तत्र हस्तक्षेपेण दग्धो भवेत्तत्र नैवाऽग्नेर्दोषः, वैद्योक्तपथ्यविधिमुत्सृज्याऽविधिनौषधसेवनेनाऽहितं स्यात्तत्र न वैद्यस्य दोषः, किन्तु कुवासनावासितस्वाशयस्यैव। एवं सकलजगज्जन्तुजातहितावहस्याऽप्यनन्तगुणनिधेर्भगवतः शास्त्रोक्तविधिमुत्सृज्य निकाचितपापकर्मकलुषितात्मभिरविधिनाऽर्चनेऽहितप्राप्तिस्स्यात्तत्र न भगवतो दोषः, किन्तु स्वीयदुष्टाशय एव कारणम्।

प्रभुशासने शुभाशुभात्मपरिणाम एव मुख्यवृत्त्या शुभाशुभकर्मबन्धकारणं, निश्चयनयेन स्वाशयशुद्धौ गुणावाप्तिस्तदशुद्धौ च दोषावाप्तिरिति हेतोः।

नन्वस्तु जिनप्रतिमापूजनं सफलं तथापि तत्फलं किमिति चेत्, उच्यते–शास्त्रे प्रोक्तम्–

[1]"जिणपूअणं तिसंझं, कुणमाणो सोहए य सम्मत्तं। तित्थयरनामगुत्तं, पावइ सेणियनरिंद व ॥ १ ॥

१ जिनपूजनं त्रिसन्ध्यं कुर्वन् शोधयति च सम्यक्त्वम्। तीर्थंकरनामगोत्रं प्राप्नोति श्रेणिकनरेन्द्र इव ॥ १ ॥

[1]पूएइ जो जिणचंदं, तिन्नि वि संझासु पवरकुसुमेहिं। सो पावइ सुरसुक्खं, कमेण मुक्खं सया सुक्खं ॥२॥
[2]इक्केण वि कुसुमेणं, भत्तीई वीयरायपूयाए। पावइ परमविभूइं, जीवो सिरिकुमारपालु व ॥ ३ ॥
[3]कंचणमोत्तियविद्दुम-रयणाभरणेहिँ भावसंजुत्तो। जो पूएइ जिणिंदं, सो पावइ सासयं ठाणं ॥४॥" इत्यादि।
श्रीपर्युषणायां त्वष्टसप्तदशादिभेदैस्सर्वप्रकारद्रव्यभावभक्त्या विशेषतः पूजा कार्या। तदुक्तम्—
[4]"संवच्छरचाउम्मा—सिएसु अट्ठाहिआसु अ तिहिसु। सव्वायरेण लग्गइ, जिणवरपूआतवगुणेसु ॥१॥" इति।
अत्र विशेषपूजाकरणे किं फलमिति चेत्, तृतीये सप्तमेऽष्टमे वा भवे मोक्षप्राप्तिः। तदुक्तम्—
[5]"जो पूयइ पज्जुसणे, जिणिंदरायं तहा विगयदोसं। सो तइयभवे सिज्झइ, अहवा सत्तट्ठमे जम्मे ॥१॥" इति।
एतेनाऽलङ्करणैर्भगवत्प्रतिमा नाऽलङ्करणीया, भगवतो निष्परिग्रहत्वादिति दिगम्बरीयमतमपि निरस्तं, तथा

श्रीपर्युषणादौ विशेषपूजाकरणफलाधिकारः।

---

१ पूजयति यो जिनचन्द्रं तिसृष्वपि सन्ध्यासु प्रवरकुसुमैः। स प्राप्नोति सुरसुखं क्रमेण मोक्षं सदा सौख्यम् ॥ २ ॥
२ एकेनाऽपि कुसुमेन भक्त्या वीतरागपूजया। प्राप्नोति परमविभूतिं जीवः श्रीकुमारपाल इव ॥ ३ ॥
३ काञ्चनमौक्तिकविद्रुमरत्नाभरणैर्भावसंयुक्तः। यः पूजयति जिनेन्द्रं स प्राप्नोति शाश्वतं स्थानम् ॥ ४ ॥
४ संवत्सरचातुर्मासिकेष्वष्टाह्निकासु च तिथिषु। सर्वादरेण लगति जिनवरपूजातपोगुणेषु ॥ १ ॥
५ यः पूजयति पर्युषणे जिनेन्द्रराजं तथा विगतदोषम्। स तृतीयभवे सिध्यत्यथवा सप्ताष्टमे जन्मनि ॥ १ ॥

सति कुङ्कुमादिविलेपनपुष्पाद्यारोपणादिकमपि तत्र नैव कर्तव्यं स्यात्, तस्याऽपि परिग्रहरूपत्वात्, न च तन्निर्मलभाववृद्धिकारकत्वात्कर्मनिर्जराकारकमिति तद्विधेयमिति चेत्, तुल्यमत्राऽपि ।

एतेन नव्यैरुच्छृङ्खलैर्युवकैर्भगवत्प्रतिमायां नवाङ्गटीकाकरणं न युक्तियुक्तमिति यदुच्यते तदपि निरस्तम् । आवश्यकचूर्णौ-अष्टापदपर्वते भरतकृताया भगवत्प्रतिमायाः-[1]"कणगमया निडालपट्टा तवणिज्जमया बुब्बुया तवणिज्जमया सिरिवच्छा" इत्यादिपादाभ्यामारभ्य शीर्षान्तं यावत्सविस्तरवर्णनस्योक्तत्वात् ।

प्रतिमाऽऽ-
भूषणा-
धिकारः ।

अथाऽत्र तपःकर्तव्यतामाह-

ज्ञानी सुदृष्टिरपि कोऽपि तपो व्यपोह्य, मोक्षं गतो न च निहन्ति निकाचितं तत् ।
कर्माऽपि तेन विभुना शिवशर्महेता-वभ्यर्हितं गदितमित्यवगम्य विज्ञैः ॥ ६ ॥
धृत्वाऽत्र धैर्यसुविवेकवरक्षमास्त्रं, जित्वा च मोहनृपमप्यमरोपसर्गे ।
कार्याऽष्टमादिविविधोग्रतपोविलोप-बुद्धिर्न सूर्ययशसेव शिवाभिलाषैः ॥ ७ ॥ युग्मम् ।

तपोविना
न कोपि
मुक्तिं गत
इति तत्क-
र्तव्यमेवे-
त्यधिकारः।

अभ्यन्तरतप इव तदुपबृंहकं बाह्यमपि तपः कर्तव्यमेव, जिनैरप्याचरितत्वात् । उक्तञ्च-

"चक्रे तीर्थकरैः स्वयं निजगदे तैरेव तीर्थेश्वरैः, श्रीहेतुर्भवहारि दारितरुजं सन्निर्जराकारकम् ।

---

१ कनकमया ललाटपट्टास्तपनीयमया बुब्बुकास्तपनीयमयाः श्रीवत्साः ।

सद्यो विघ्नहरं हृषीकदमनं माङ्गल्यमिष्टार्थकृद्, देवाकर्षणमारदर्पदलनं तस्माद्विधेयं तपः ॥१॥" इति।

तथा च शल्यत्रयोन्मूलनं जन्मत्रयपावनमष्टमतपोऽपि नागकेतुवत्कर्तव्यमेव महाफलदायित्वात्। उक्तश्च-

"[1]जं छम्मासियवरसिय-तवेण तिव्वेण कोडिवरिसेण। पावं झिज्जइ मुणिणो, अट्ठमेणं तह पज्जुसणे ॥१॥" इति।

न च तपस्यऽधृतिरपि कर्तव्या, धीरतायामेव तस्य सफलत्वात्। उक्तश्च-

"[2]जस्स धिई तस्स तवो,जस्स तवो तस्स सोग्गई सुलहा। जे अधितिमंतपुरिसा,तवो वि खलु दुल्लहो तेसिं॥ १॥इति।

महातपस्विभक्तिं स्वहस्तेन कृत्वैव मुख्यवृत्त्या प्रत्याख्यानं पारयितव्यमिति तदानीमपि धृतिर्धर्तव्या।

एतेनाऽभ्यन्तरमेव ज्ञानध्यानादितपः कर्तव्यं, तस्यैव निकाचितकर्मणोऽपि विनाशकत्वात्, न बाह्यं तप इत्यारेकापि निरस्ता, बाह्यतपसो जिनैरप्याचरितत्वात्, अभ्यन्तरतपःपुष्टिकारित्वेन तत्सहकृतस्यैवाऽभ्यन्तरतपसो निकाचितकर्मणोऽपि विनाशकत्वाच्च, मदोन्मत्तेन्द्रियाश्वदमनकारित्वाच्च कर्तव्यमेव तत्, प्रतिलेखनादिक्रियावत्। न च तपःकाले क्रोधादिसामग्रीसद्भावेऽपि क्रोधमानादिरपि कर्तव्यः, किन्तु क्षमास्त्रमेवाऽमोघं मोहमहाराजविजये धर्तव्यं विवेकश्च कर्तव्यः, न च वन्दनपूजनसत्काराद्यभिलाषाऽपि कर्तव्या, यतस्तथाकरणे तदपूर्वफलोत्पत्तिरेव न स्यात्। तदेव सिद्धान्तोक्तदृष्टान्तेन प्रदर्श्यते। तथाहि-

अष्टमतपः-कर्तव्यतोपदेशः तत्फलव्यावर्णनञ्च।

अभ्यन्तरमेव तपः कर्तव्यं नतु बाह्यमिति शङ्कोद्धारः।

---

१ यत् षाण्मासिकवार्षिकतपसा तीव्रेण कोटिवर्षेण। पापं क्षीयते मुनेरष्टमेन तथा पर्युषणे ॥ १ ॥

२ यस्य धृतिस्तस्य तपो यस्य तपस्तस्य सद्गतिस्सुलभा। येऽधृतिमन्तः पुरुषास्तपोऽपि खलु दुर्लभं तेषाम् ॥ १ ॥

नागदत्तो नाम राजपुत्रो बाल्यावस्थायामेव वैराग्यरसार्द्रहृदयः प्रव्रजितः, स च किल पूर्वतिर्यग्भवानुभावेनाऽतिक्षुधालुः प्रभातसमय एव भोक्तुमारभते यावत्सूर्यास्तमनवेलं, तथाप्युपशान्तस्वभावो धर्मश्रद्धालुश्च ।

तस्मिंश्च गच्छे चत्वारस्तपस्विनस्तद्यथा—चातुर्मासिकस्त्रिमासिको द्विमासिक एकमासिकश्च, रजन्यां काचिद्देवता वन्दनार्थमागता, चतुस्त्रिद्व्येकमासिका अनुक्रमेण स्थिताः क्षुल्लकश्च तदनु स्थितः, तान् सर्वांस्तपस्विनः परिहृत्य तया देवतया क्षुल्लको वन्दितः, पश्चात्ते सर्वे तपस्विनो रुष्टाः, निर्गच्छन्ती सा देवता पूर्वं चातुर्मासिकेन गृहीता वस्त्रेण, भणिता चाऽनेन तपस्विना, हे कटपूतने ! अस्मांस्तपस्विनः किमिति न वन्दसे ? कथमेनं कूरभाजनं साधुं वन्दसे ? सा देवता भणति—अहं भावतपस्विनं वन्दे, न पुनः पूजासत्कारपरान् मानिनश्च तपस्विनः, पश्चात्ते तपस्विनस्तं वन्द्यमानं क्षुल्लकं प्रत्यमर्षं वहन्ति । देवता चिन्तयति, एते क्षुल्लकं मा निर्भर्त्सयन्तु, ततः सन्निहिता चैव तिष्ठामि, निर्भर्त्सनं चेत्ते कुर्युस्तदा प्रतिबोधयिष्यामि । द्वितीयदिवसे क्षुल्लकस्तत्तपस्व्याज्ञापुरस्सरं भिक्षार्थं गतः, प्रत्यागत आलोच्य चातुर्मासिकक्षपकं निमन्त्रयति, तेन तपस्विना तस्य पतद्ग्रहे श्लेष्म निष्ठ्यूतं, क्षुल्लको भणति, तुभ्यं मया श्लेष्ममल्लको न दत्तस्तत् क्षम्यतां, मिथ्या मे दुष्कृतं भवतु, पुनरेवं न करिष्यामि, तच्छ्लेष्म तेन क्षुल्लकेनोपरित एव बहिष्कृत्य श्लेष्ममल्लके क्षिप्तं, अन्यच्चाऽऽहारजातं भुक्तं, एवं यावत्त्रिमासिकेन द्विमासिकेनैकमासिकेन च श्लेष्म क्षिप्तं तत्तेन तथैव दूरीकृत्य श्लेष्ममल्लके क्षिप्तं, बला-

तपःकाले वन्दनपूजनसत्काराद्यभिलाषाकरणे नापूर्वफलोत्पत्तिरिति सदृष्टान्तमुपवर्णनम् ।

त्कारं कृत्वा लम्बनान् गृह्णामीति कृत्वा तपस्विना क्षुल्लको बाहौ गृहीत उपालम्भश्च दत्तः, तदानीं तस्य क्षुल्लकस्याऽदीनमनसश्च विशुद्धपरिणामस्य विशुद्ध्यमानाभिर्लेश्याभिर्घातिकर्मक्षयेण केवलज्ञानमुत्पन्नम् ।

तदा सा देवता भणति, कथं यूयं वन्दितव्याः ? येन क्रोधाभिभूतास्तिष्ठथ, एवं देवतावचनं हितकरं श्रुत्वा ते तपस्विनस्संवेगमापन्ना मिथ्या मे दुष्कृतमित्युक्तवन्तः, अहो! बालोऽप्युपशान्तचित्तः पुण्यमूर्त्तिरस्माभिः क्रोधाभिभूतैः पापमूर्त्तिभिराशातितः । एवं चतुर्णामपि तेषां शुभाध्यवसायेन क्षपकश्रेणिमारोहतां केवलज्ञानं समुत्पन्नमिति ।

तथा च क्रोधाभिभूतेन पूजासत्कारादिभावनया च तपो न कार्यं, किन्त्वपूर्वोपशमादिभावेनैव तत्कर्तव्यम्,

तपःकरणकालेऽज्ञैस्स्वकुटुम्बिवर्गैस्स्नेहात् प्रतिरोधेऽपि देवोपसर्गेऽपि चाऽक्षोभक्षमाविवेकपुरस्सरं मनोधैर्यं धृत्वा प्रवृद्धपरिणामिना मोक्षार्थिनाऽतिगाढकर्मतज्जन्यासह्याभ्यन्तरतापदाहोपशमार्थं नैव श्रीपर्युषणपर्वणि तपोविलोपबुद्धिः कर्तव्या ।

श्रीभरतचक्रवर्तिपुत्रश्रीसूर्ययशोनृपवत् । तथाहि–

अनेकसद्रत्नचयैर्मनोज्ञा, सर्वर्त्तुरम्या धनधान्यपूर्णा ।
कैवल्यलक्ष्मीप्रसवाऽमरेन्द्र–पुरीव शश्वद्विबुधाधिवासा ॥ १ ॥

स्वजनैः प्रतिरोधेऽपि देवोपसर्गेऽपि च न तपोविलोपबुद्धिः कार्या श्रीसूर्ययशोवदिति-निरूपणम् ।

जिनेन्द्रजन्मादिपवित्रतीर्थ-भूता जनानामघराशिहन्त्री ।
सम्यक्त्वसंवर्द्धनहेतुभूता-ऽयोध्या पुरी वैरिगणैरयोध्या ॥ २ ॥ युग्मम् ।
अनेकभूपालविशालमौलि-कोटीररत्नाश्रितपादपद्मः ।
वर्वर्त्ति तस्यां धृतसत्प्रतिज्ञो, वीरव्रतः सूर्ययशा नृपालः ॥ ३ ॥
अभूत्तदीया रमणीललाम-भूता जयश्रीर्ललनाऽतिहृद्या ।
विद्याधरी सर्वगुणा च राधा-वेधेन प्राप्ता कुलजा मनोज्ञा ॥ ४ ॥
पतिव्रता शीलधना विवेक-धामा प्रियप्रेमरता सुधर्मा ।
जिनेन्द्रपूजाभिरता सदैव, व्रतोद्यता सत्यप्रियंवदा च ॥ ५ ॥
नरेन्द्रचित्तानुगता कुलीना, वदान्यचित्ता विमलस्वभावा ।
मुनीश्वराणां प्रतिलम्भने द्राक्, कृतादरा सत्त्वदयावती च ॥ ६ ॥
त्रिंशत्सहस्राणि पराण्यथाऽस्य, कलत्रभूतानि नृपस्य चाऽऽसन् ।
याभिः समं सूर्ययशा महीपो, गार्हस्थ्यकृत्यं विधिवद्वितेने ॥ ७ ॥
युगादिनाथाय च राज्यकाले, शक्रेण साक्षादुपढौकितं यत् ।
तदेव दध्रे मुकुटं मनोज्ञं, चक्रीश्वरः श्रीभरतोऽपि शीर्षे ॥ ८ ॥

बभार तत्सूर्ययशा नृपोऽपि, तेनैव लब्धद्विगुणोदयः सः ।
स्वामीव देवैरपि सेवनीयः, सदैव दूरीकृतशत्रुवर्गः ॥ ९ ॥
श्रुत्वाऽत्र धर्मं वनपक्षिणोऽपि, भक्ष्यं न गृह्णन्ति च पर्वतिथ्याम् ।
कथं मनुष्यो जिनधर्मवेत्ता,–ऽऽहारं हि कुर्याद् वरपर्वतिथ्याम् ॥ १० ॥
[1]"जइ सव्वेसु दिणेसु, पालह किरिअं तओ हवइ लट्ठं । जं पुण तहा न सक्कह, तहवि हु पालिज्ज पव्वदिणं ॥ १ ॥
[2]सव्वेसु कालपव्वे–सु पसत्थो जिणमए हवइ जोगो । अट्ठमिचउद्दसीसु अ, नियमेण हविज्ज पोसहिओ ॥ २ ॥"
एवं युगादीशगिरं निशम्य, तपो विना न स्वजनुः करिष्ये ।
व्यर्थं प्रमादादिति कार्यमेव, सुरोपसर्गेऽपि तपो मया वै ॥ ११ ॥
निश्चित्य चैवं सुदृढप्रतिज्ञो,–ऽष्टमीं नृपस्सूर्ययशा विशिष्य ।
चतुर्दशीं पौषधसुव्रतेन, चाऽऽराधयाञ्चक्र उदग्रभावात् ॥ १२ ॥
जिनेन्द्रवाक्ये दृढभक्तियोग–माराधनां पर्वतिथेश्च दृष्ट्वा ।
अतिप्रसन्नो मघवा सुराणां, सभास्थितस्तं प्रशशंस बाढम् ॥ १३ ॥

श्रीसूर्ययशोनृपदृष्टान्तोपवर्णनम् ।

---

१ यदि सर्वेषु दिनेषु पालयथ क्रियां ततो भवति लष्टम् । यत्पुनस्तथा न शक्नुथ तथापि पालयत पर्वदिनम् ॥ १ ॥
२ सर्वेषु कालपर्वसु प्रशस्तो जिनमते भवति योगः । अष्टमीचतुर्दशीषु च नियमेन भवेत्पौषधिकः ॥ २ ॥

श्रुत्वोर्वशी विस्मयमादधाना, न मन्यते तद्वचनं कथञ्चित् ।
व्रतादवश्यं प्रतिपातयिष्ये, तं मेरुशृङ्गादिव गण्डशैलम् ॥ १४ ॥
इति प्रतिज्ञां हृदये निधाय, कराम्बुजे सम्परिगृह्य वीणाम् ।
रम्भासमं भूपपरीक्षणार्थं, स्वर्गात्क्षितौ साऽवततार सद्यः ॥ १५ ॥
नाभेयनाथस्य विशालचैत्ये,-ऽयोध्यापुरीसन्निहिते तदैव ।
विमोहकृद्रूपमहो ! विधाय, गातुं प्रवृत्ता स्वरमूर्च्छनाभिः ॥ १६ ॥
तद्गीतिमाधुर्यरसाभिमग्ना, विहङ्गमा वा मृगजातयश्च ।
आलेख्यभूता इव तस्थुरत्र, न केऽपि चेष्टामपि कर्तुमीशाः ॥ १७ ॥
अशेषहस्त्यश्वपदातयोऽपि, नादेन मुह्यन्ति सुखैकमग्नाः ।
अनल्पसौख्यैकनिदानभूतो, नादः सुधामप्यधरीकरोति ॥ १८ ॥
युगादिनाथं प्रणिपत्य चैत्ये, तत्रैव गेयश्रवणं करिष्ये ।
इत्थं विचिन्त्य क्षितिनायकोऽपि, ससैनिकोऽगात्सचिवेन साकम् ॥ १९ ॥
जिनेशितुः पादयुगं प्रणम्य, पश्चान्निवृत्तः सचिवं जगाद ।
मन्त्रिन्निमे के ? कुत आगते ? स्त, इति प्रजानीहि समेत्य तत्र ॥ २० ॥

श्रुत्वेति वाचो नृपतेस्तदानीं, तयोः समीपं सचिवो जगाम ।
के स्थो युवां? को युवयोः पतिर्हि?, किमर्थमत्राऽऽगमनं? मनोज्ञे! ॥ २१ ॥
सर्वं समाशंसतमत्र सूर्य–यशा महीन्द्रः समुपस्थितो हि ।
इतीरितं मन्त्रिवरस्य तस्य, निशम्य चैकाऽथ तयोर्बभाषे ॥ २२ ॥
आवां नु मन्त्रिन्! मणिचूडनाम्नो, विद्याधरेन्द्रस्य सुते अवेहि ।
अनेकविद्यागुणगुम्फितस्य, कुमारिके स्वो निजधर्मरक्ते ॥ २३ ॥
आबाल्यकालाच्च कलाऽऽहृतं नौ, वीणासु सम्यग्रमते मनो हि ।
अहर्निशं पुस्तकवाचनातो, जिनेश्वराराधनमग्नमेव ॥ २४ ॥
बाल्यात्परं वीक्ष्य वयोनिवेशं, चिन्ता पितुर्नौ महती बभूव ।
कस्मै प्रदेये वरकन्यके द्वे, इत्युत्कटोद्वेगविधानदक्षे ॥ २५ ॥
आवां जगत्यामपि नो सदृक्षं, लभावहे क्वाऽपि पतिं सुमन्त्रिन्!
जिनेश्वराराधनमेव कृत्वा, जनुः स्वकीयं सफलं विदध्वः ॥ २६ ॥ युग्मम् ।
जगत्यशेषेऽतिपवित्रभूता,–ऽयोध्या पुरीयं जिनपादपूता ।
अतोऽत्र चैत्ये जिनमर्चयावः, सद्भक्तियोगादुपवीणयावः ॥ २७ ॥

श्रीसूर्यय-
शोनृपदृ-
ष्टान्तोप-
वर्णनम् ।

निशम्य तद्वाचमुवाच मन्त्री, श्रीसूर्यभूपेन च सङ्गमो वाम् ।
श्रेयान् यतोऽसौ वृषभध्वजस्य, नप्ता महीयान् भरतस्य पुत्रः ॥ २८ ॥
कलाकलापाकलितोऽतिसौम्य-प्रेयान् प्रवीरो युवयोरयं स्यात् ।
ज्योत्स्नानिशे चन्द्रमसं समेत्य, भातस्तथा, सूर्यनृपं भवत्यौ ॥ २९ ॥
इत्याग्रहं भूपतिमन्त्रिणस्ते, प्रगृह्य चैत्याग्रतले प्रयाते ।
राजाऽपि तत्प्रेमरसापकृष्ट-स्तयोः समक्षं समुपाजगाम ॥ ३० ॥
परस्परप्रेमविधानभाजा, गान्धर्वरीत्या प्रविवाह्य चैते ।
ताभ्यां समं वैषयिकं सुखं स, भेजेऽनिशं सूर्ययशा महीन्द्रः ॥ ३१ ॥
ताभ्यां समं भूपतिरन्यदा तु, वातायनस्थानमुपाजगाम ।
ते अष्टमी श्वो भवितेति ढक्का-नादानुगां संशृणुतस्स्म वाचम् ॥ ३२ ॥
तदोर्वशी स्वावसरं विचार्य, वर्यानकोद्घोषणकारणं किम् ? ।
अजानतीव प्रणता नरेशं, पप्रच्छ सोऽपि प्रति तां जगाद ॥ ३३ ॥
चतुर्दशी चाऽष्टमिका च पर्व, तातोक्तमष्टाह्निकपर्वयुग्मम् ।
अयं चतुर्मासगतं तथेत्थं, पर्वोत्तमं पर्युषणाख्यपर्व ॥ ३४ ॥

स्नानं कलिर्धूतकषायसङ्गौ, स्त्रीसेवनं पर्वसु नैव कार्यम् ।
भाव्यं शुभध्यानवता विधेयं, सामायिकं पौषधसद्व्रतं च ॥ ३५ ॥
षष्ठाष्टमाद्युग्रतपो जिनेन्द्र–स्तुतिं जिनार्चां विदधीत नित्यम् ।
सिद्धान्तवाक्यश्रवणं च भक्त्या, मुनेः पदाब्जद्वयवन्दनं च ॥ ३६ ॥
त्रयोदशीसप्तमिकादिनेऽङ्ग–जनावबोधाय निदेशतो मे ।
भम्भारवोद्घोषणमत्र पुर्यां, प्रिये ! सदैव क्रियतेऽतियत्नात् ॥ ३७ ॥
अथोर्वशी तद्वचनं निशम्य, सम्मोहनायैव महीश्वरस्य ।
मायाप्रबन्धे चतुरा जगाद, किञ्चित्तदा विस्मयमादधाना ॥ ३८ ॥
मनुष्यजन्मोच्चतरं च राज्यं, नूत्नं वयः कान्तमिदं वपुश्च ।
लब्ध्वा तपोभिः कथमेव कष्टै–र्विडम्ब्यते मुग्धतया नरेन्द्र ! ॥ ३९ ॥
सम्भुङ्क्ष्व सौख्यं कुरु राज्यमेतद्, दारिद्र्यदावानलवारिदाभम् ।
करिष्यसि त्वं सुतपोऽपि पश्चाद्, गतं वयो नैव पुनः समेति ॥ ४० ॥
श्रुत्वेति वाक्यं नृपतिर्जगाद, रेरेऽधमे ! धर्मविरुद्धमेतत् ।
ब्रवीषि विद्याधरवंशयोग्यं, नैतद्वचस्ते रुचितं न मह्यम् ॥ ४१ ॥

श्रीसूर्ययशोनृपदृष्टान्तोपदर्शनम् ।

मनुष्यजन्माऽपि धिगस्तु तस्य, सुपर्वसंराधनवर्जितस्य ।
अतो जिनाज्ञां वितथां न कुर्यां, यावच्छरीरे मम जीवनं स्यात् ॥ ४२ ॥
अथोर्वशी तद्वचनं निशम्य, जगाद रुष्टा परिमोहयन्ती ।
स्वच्छन्दचारी नृपतिर्वृतो यत्, तेनाऽतिदीने परिवञ्चिते स्वः ॥ ४३ ॥
भ्रष्टाऽस्मि शीलादथ सौख्यतोऽपि, तन्मेऽस्तु भद्रं मरणं चितायाम् ।
न पुंस्त्रियोर्यत्र मिथोऽनुराग–स्तन्मान्मथं सौख्यमहो ! मुधैव ॥ ४४ ॥
महीमहेन्द्रोऽपि तदैव तस्या, वचः प्रतप्तत्रपुसन्निभं तत् ।
निशम्य तातस्य कुले प्रजातः, कथं नु धर्मं परिसन्त्यजामि ? ॥ ४५ ॥
कृशाङ्गि ! कोषं निखिलं मदीयं, गृहाण रत्नानि महीं च सर्वाम् ।
सर्वस्य सौख्यस्य निदानतो मां, न धर्मकृत्यात्परिहापय त्वम् ॥ ४६ ॥
प्रयातु राज्यं यदि वा कृतान्तः, शिरो मदीयं सहसाऽऽच्छिनत्तु ।
तथापि पापाग्निजलात्कदापि, व्यपैतु धर्मान्न मनाङ्मतिर्मे ॥ ४७ ॥
पितामहोक्तं विहितं च पित्रा, यत्तत्तपोऽहं परिमुच्य नैव ।
जिनेश्वरोद्दिष्टमिदं सुपर्व, नीचात्मपुंवच्च मुधानयामि ॥ ४८ ॥

[1]"अलसायंतेण वि स-ज्जणेण जे अक्खरा समुल्लविया । ते पत्थरेसु टंकु-ल्लिहियव्व न हु अन्नहा हुंति ॥१॥
[2]छिज्जउ सीसं अह हो-उ बंधणं चयउ सव्वहा लच्छी । पडिवन्नपालणे स-प्पुरिसाण जं होइ तं होउ ॥ २॥"

श्रुत्वेति हास्येन प्रमादतोऽप्यु-क्तं नाऽन्यथा सुज्ञजनः करोति ।
तदोपयुक्तेन मया तु प्रोक्तं, व्यर्थं प्रजानन् किमिति प्रकुर्वे ॥ ४९ ॥
कोपारुणाक्षी निजगाद बाला, "वचस्त्वदीयं वितथं न कुर्वे" ।
इति प्रतिज्ञा विहिता पुरस्तात्, त्रैलोक्यनाथस्य जिनेश्वरस्य ॥ ५० ॥
परित्यजंस्तां कथमेव राजन्!, न लज्जसे! सभ्यजनस्य मध्ये ।
श्रुत्वा तदुक्तिं निजगाद भूय-श्चिन्ताभराक्रान्तमना महीशः ॥ ५१ ॥
अन्यद्यथेष्टं परिमार्गय त्वं, न पर्वभङ्गं मम कारय त्वम् ।
श्रुत्वोर्वशी तद्गतनिश्चयार्थं, भूयोऽपि राजानमिदं बभाषे ॥ ५२ ॥
न पर्वभङ्गं कुरुषे महीप!, जिनेन्द्रचैत्यं ननु पातय द्राक् ।
श्रुत्वेति मूर्च्छामगमन्महीन्द्रो, हाहेति नादः प्रससार तत्र ॥ ५३ ॥

श्रीसूर्ययशोनृपदृष्टान्तोपदर्शनम् ।

---

१ अलसायमानेनाऽपि सज्जनेन येऽक्षरास्समुल्लपिताः । ते प्रस्तरेषु टङ्कोल्लिखिता इव न खल्वन्यथा भवन्ति ॥ १ ॥
२ छिद्यतां शीर्षमथ भवतु बन्धनं त्यजतु सर्वथा लक्ष्मीः । प्रतिपन्नपालने सत्पुरुषाणां यद्भवति तद्भवतु ॥ २ ॥

नृपोऽथ शीताम्बुनिषेचनेन, मन्त्र्यादिना स्वस्थ उवाच चेत्थम् ।
रे रेऽधमे ! त्वं वितथं ब्रवीषि, पवित्रवंशो तव नैवं जन्म ॥ ५४ ॥
चाण्डालजा त्वं कथमन्यथा हि, जिनेन्द्रचैत्योद्दलने नियोगः ।
राज्यादिकं सर्वमिदं प्रयातु, प्राणा मदीया अपि यान्तु दूरम् ॥ ५५ ॥
न चैत्यभङ्गं मनसाऽपि कुर्वे, याचस्व चित्तेप्सितमत्र तेऽन्यत् ।
जगाद भूयोऽपि च सा नताङ्गी, छित्त्वा स्वयं पुत्रशिरो रयेण ॥ ५६ ॥
प्रदेहि मे पाणितले नरेन्द्र !, श्रुत्वेति राजा निजगाद भूयः ।
मत्तोऽभवत्सूनुरयं ततो मे, शिरो गृहीत्वा प्रमदे ! प्रसीद ॥ ५७ ॥ युग्मम् ।
इत्थं समुच्चार्य नृपः कृपाणं, जग्राह यावत्स्वशिरोऽभिभेत्तुम् ।
कृपाणधाराऽपि तदैव कुण्ठा, कृता तया स्वीयबलेन सद्यः ॥ ५८ ॥
अन्यं कृपाणं जगृहे नृपोऽसौ, तस्याऽपि धाराऽथ विकुण्ठिताऽभूत् ।
यं यं कृपाणं नृपतिस्तदानीं, गृह्णाति तं साऽऽशु वऽकरोद्विकुण्ठम् ॥ ५९ ॥
राजा कथञ्चिन्न मनाक् स्वसत्त्वा-च्चचाल धर्मैकमनाः प्रवीरः ।
तदा स्वरूपं प्रविधाय तेऽथ, जयेति भूपं गदतस्स्म तत्र ॥ ६० ॥

अपूर्वसत्त्वं तव नाथ! येन, मनाङ्न धर्माच्चलितोऽसि भूप!।
सङ्ग्रामशूरा भुवि दानशूरा, इतस्ततो भान्ति सहस्रशोऽपि ॥ ६१ ॥
न धर्मशूरा भवतः सदृक्षा, विलोकयावो भुवने समस्ते।
जयाऽऽदिनाथान्वयशीतभानो!, चक्रीशवंशाम्बरतिग्मभानो! ॥ ६२ ॥ युग्मम्।
जयाऽनिशं सत्त्ववतां धुरीण!, जय! क्षितीशामलवंशकेतो!।
तवोपमानं नहि धर्मकृत्ये, लभावहे धर्मवतां धुरीण! ॥ ६३ ॥
यथा सुमेरुर्न चलेत्कदापि, तथा न धर्मात्त्वमपीति यावत्।
स्तवीति तावत्समुपाजगाम, स्वर्गात्सुरेन्द्रो विकिरन् सुमानि ॥ ६४ ॥
भ्रष्टप्रतिज्ञेन्द्रनिरीक्षिता सा, सहासमच्छे कनके च तस्मिन्।
किं श्यामिका संलगतीति तस्य, गुणान् विशिष्येन्द्रपुरो जगौ द्राक् ॥ ६५ ॥
ततः किरीटं वरकुण्डले द्वे, हारं प्रदाय प्रणिपत्य तं च।
स्वर्गं ययौ सूर्ययशाः सुनीत्या, ररक्ष भूमिं धृतधर्मनिष्ठः ॥ ६६ ॥
श्रीसङ्घयात्रां विदधे पवित्रां, साधर्मिकान् भोजयति स्म भूरि।
सपादलक्षास्तनया बभूवु-र्महायशा आद्य आर्हताग्र्याः ॥ ६७ ॥

श्रीसूर्यय-
शोनृपदृ-
ष्टान्तोप-
दर्शनम्।

अथाऽन्यदा स्वं मणिदर्पणेषु, पश्यन्नसारं प्रतिबुध्य सर्वम् ।
स केवलज्ञानमवाप सद्यो, भव्यान् प्रबोध्योपजगाम मोक्षम् ॥ ६८ ॥

आकर्णयन्ति नृपसूर्ययशश्चरित्रं, ये धारयन्ति हृदयेऽथ तथाऽऽचरन्ति ।
निश्शेषकर्मनिचयान् परिमुच्य तेऽपि, शुद्धा भवन्ति प्रभुदर्शनजानुभावात् ॥ ६९ ॥

अथ कल्याणधाम्नि श्रीपर्युषणपर्वणि न च स्वयं तपःकरणमात्रेण सन्तोषितव्यं, किन्तु—[1]"जो पइदिणं चोएइ धम्मे सो कल्लाणमित्तो" इति लक्षणकल्याणमित्रीभूयाऽज्ञजनैः प्रोत्साहितैस्तपः कारयितव्यमित्याशयेनाऽऽह—

भाग्याप्तपर्युषणपर्वणि सज्जना भोः!, सर्वप्रमादमवधूय तपः कुरुध्वम् ।
नाऽर्हो विलम्ब इति प्रेरणतोऽज्ञपुंसः, प्रोत्साह्य तद्धितगिराऽत्र विधापयेज्ज्ञः ॥ ८ ॥

न च तपःकर्तुः कदाचिद्दैवयोगात्तपःकाल एव मरणे प्रोत्साहयितुर्विराधकत्वं स्यादिति वाच्यं, तस्य शुभपरिणामसद्भावेनाऽऽराधकत्वात्, तदेव वृद्धवादेन साध्वीदृष्टान्तेन दशवैकालिकसूत्रटीकायां प्रोक्तं, तथा हि—

श्रीपर्युषणेऽज्ञजनान् हितगिरा प्रोत्साह्य तैस्तपः कारयितव्यमित्यऽधिकारः । ॥ २७ ॥

---

१ यः प्रतिदिनं चोदयति धर्मे स कल्याणमित्रम् ।

कयाचिदार्यया ऽसहिष्णुः कूरगडुकप्रायः संयतश्चातुर्मासिकादावुपवासं कारितः, स तदाराधनया मृत एव, ऋषिघातिकाऽहमित्युद्विग्ना सा तीर्थङ्करं पृच्छामीति गुणावर्जितदेवतया नीता श्रीसीमन्धरस्वामिसमीपं पृष्टो भगवान् अदुष्टचित्ताऽघातिकेत्यभिहितवानिति।

अथाऽत्र श्रावकाणां द्रव्यसाधर्मिकवात्सल्यकर्तव्यतामाह–

कार्येष्टभोजनविभिन्नप्रभावनाद्यै–राभ्वादिवन्निखिलसङ्घसप्रेमभक्तिः।

सङ्घो हि तीर्थकरपूजित इत्यतोऽनु–पूज्यस्य तस्य परिधापनिका प्रदेया॥ ९॥

द्रव्यसाधर्मिकवात्सल्यमप्यत्र कर्त्तव्यमित्यधिकारः।

क्षमाभूषणाभूश्रेष्ठिदृष्टान्तश्चैवम्–

लघुकाश्मीरापराभिधे थारापद्रनगरे श्रीश्रीमालीसङ्घपतिराभूनामा पश्चिममण्डलीकविरुदधारी निवसति स्म।

अथैकदा मण्डपदुर्गे सङ्घपतिझाञ्झणदेवाग्रे तद्भट्टेन 'प्राघुर्णकसाधर्मिकवात्सल्यभोजनदानं विना न भुङ्क्ते सङ्घपतिराभूः' इत्यादिगुणवर्णनं कृतं, ततस्तद्गुणश्रवणचमत्कृतस्तत्परीक्षार्थं प्रच्छन्नवृत्त्या पृथक् पृथग्वर्त्मना सङ्केतितदिने समकालं द्वात्रिंशत्सहस्रसाधर्मिकसङ्घेन सार्धं श्रीझाञ्झणोऽविच्छिन्नप्रयाणैरश्ववारैरज्ञातागमनस्वरूपश्चतुर्दशीदिने श्रीमदाभूश्रेष्ठिनि गृहीतपौषधे जिनालये निसीही ३ कुर्वाणः ससङ्घः सम्प्राप्तः, सङ्घपत्या-

भूलघुभ्रात्रा जिनदासनाम्ना निमन्त्रितस्तदा स तदावासे गतो दुग्धपादप्रक्षालनपूर्वमासनेषूपवेशितः, आभूश्रेष्ठी नमस्कारं गृणन् समागतस्तदा भ्रात्रा जिनदासेन प्रोक्तं स्थालानि कीदृशान्युपयुनज्मि ? सङ्घपतिनोक्तं यद्यस्मिन् पुण्यसमये स्वर्णरूप्यमयानि स्थालानि नोपयोगीनि तदा कदोपयोगितामायास्यन्तीति स्वर्णरूप्यमयान्येव, तदा पञ्च पञ्च शतानि पङ्क्तौ पङ्क्तौ स्वर्णरूप्यमयानि स्थापितानि, एवं याममध्येऽपि सकलः श्रीसङ्घो भोजितः, परिधापितश्च पञ्चवर्णपट्टदुकूलभूषणादिभिः, तदनु सङ्घपतिझाञ्झणः सङ्घपत्याभूश्रेष्ठिपादयोर्लग्नो मदीयोऽपराधः क्षन्तव्यः, किं सुवर्णे श्यामिका लगति ? त्वं भाग्यवान् यस्येदृशं गाम्भीर्यमित्यादिसङ्घपत्याभूगुणग्रामोपबृंहणां कुर्वन् श्रीशत्रुञ्जयादियात्रां कृत्वा समागतो मण्डपदुर्गं इति ।

किञ्च "षट्त्रिंशता हेममयैस्सहस्रै, रत्नोज्ज्वलैः श्रावकपुङ्गवानाम् ।
भालस्थले भूषयति स्म भक्त्या, श्रीवस्तुपालस्तिलकैर्विवेकी ॥ १ ॥"

इत्यादिप्रकारैर्यथाऽऽभूना वस्तुपालेन च श्रीसङ्घः पूजितस्तथा प्रमोदप्रकर्षेण भाग्यवता विभवानुसारेण श्रीसङ्घः पूजनीय इति । उक्तञ्च–

[१]"सत्तीइ संघपूजा, विसेसपूजा उ बहुगुणा एसा । जं एस सुए भणिओ, तित्थयराणंतरो संघो ॥ १ ॥" इति ।

१ शक्त्या सङ्घपूजा विशेषपूजा तु बहुगुणैषा । यदेष श्रुते भणितस्तीर्थकरानन्तरः सङ्घः ॥ १ ॥

क्षमाभूषणाभूश्रेष्ठिदृष्टान्तोपदर्शनम् ।

श्रीसङ्घपूजाऽधिकारः ।

तत्र जघन्यमध्यमोत्कृष्टभेदेन साधर्मिकवात्सल्यं त्रिधा । उक्तञ्च–

[1]"जहन्नं देई जवमाला, मज्झिमं तु असणपाणाई । संघप्पभावणवच्छल्ल–वत्थाभरणेहिँ उक्कोसं ॥१॥" इति ।

"सर्वात्मना भवेच्छुद्धं, यस्य श्रीसङ्घगौरवम् । तस्य सम्यक्त्वनैर्मल्यं, भवेदर्हत्पदप्रदम् ॥ १ ॥" इति ।

श्रूयते च महादुर्भिक्षकालकृतसकलसाधर्मिकवात्सल्येन श्रीसम्भवनाथजिनेन श्रीपर्युषणपर्वणि विशेषतस्सकलसाधर्मिकापूर्वभक्त्या तीर्थङ्करनामकर्म बद्धमिति । यदुक्तं श्रीसम्भवजिनप्राकृतचरित्रे–

[2]"पज्जुसणे पुव्वभवे, जिणवयणनिविडभत्तिराएण । पत्तं तित्थयरत्तं, सिरिसंभवतित्थनाहेणं ॥ १ ॥" इति ।

न च द्रव्यसाधर्मिकवात्सल्यकरणमात्रेण सन्तोषितव्यं, किन्तु धर्मकार्ये बहुप्रमादवतां श्रावकाणां धर्मानुष्ठानक्रियोपयुक्तेन श्रावकेणाऽपि तद्धितकाङ्क्षया स्मारणावारणाचोदनाप्रतिचोदनाकरणेन भावसाधर्मिकवात्सल्यमपि प्रतिदिनं कर्त्तव्यमित्याशयेनाऽऽह–

अर्हत्क्रियानिरतचित्त उपासकोऽपि, सुस्मारणादिकरणेन प्रमत्तकेषु ।
साधर्मिकेषु तदपूर्वहिताय भाव–वात्सल्यमर्हदुदितं हृदयेन कुर्यात् ॥ १० ॥

त्रिविधसाधर्मिकवात्सल्यनिरूपणं । श्रीसङ्घभक्तिफलनिरूपणञ्च ।

भावसाधर्मिकवात्सल्यमप्यत्र कर्त्तव्यमित्यधिकारः ।

---

१ जघन्यं ददाति जपमालां मध्यमं त्वशनपानादि । सङ्घप्रभावनवात्सल्यवस्त्राभरणैरुत्कृष्टम् ॥ १ ॥
२ पर्युषणे पूर्वभवे जिनवचननिविडभक्तिरागेण । प्राप्तं तीर्थकरत्वं श्रीसम्भवतीर्थनाथेन ॥ १ ॥

न च श्रावकाणां तत्राऽनधिकार इति वाच्यं, शास्त्रे तथैव विधानात्। उक्तश्च श्राद्धदिनकृत्यग्रन्थे–

[1]"साहम्मियाण वच्छल्लं, एयं अन्नं वियाहियं। धम्मट्ठाणेसु सीयंतं, सव्वभावेण चोयए ॥ १ ॥

[2]"सारणा वारणा चेव, चोयणा पडिचोयणा। सावएणाऽवि दायव्वा, सावयाणं हियट्ठया ॥ २ ॥" इति।

अन्यदिति भाववात्सल्यमित्यर्थः, विस्मृतस्य धर्मकृत्यस्य ज्ञापनेन स्मारणा कर्तव्या, कुसंसर्गाद्यकृत्यस्य निषेधेन वारणा विधेया, एतयोश्च सततं क्रियमाणयोर्हि कस्यचित्प्रमादबहुलस्य नियमस्खलितादौ सति "युक्तं किं श्राद्धकुलोत्पन्नस्य तवेत्थं प्रवर्तितुम्?" इत्यादिवाक्यैः सोपालम्भं प्रेरणेन चोदना कार्या, तथा तत्रैवाऽसकृत्स्खलितादौ सति "धिक् ते जन्म" इत्यादिनिष्ठुरवाक्यैर्गाढतरप्रेरणाकरणेन प्रतिचोदना कर्त्तव्येति।

अथ स्वलक्ष्मीसद्व्ययेन स्वकृतार्थतामाह–

दौःस्थ्याज्जिनाध्वपततो द्रढयेत् कुलीनान्, धर्मे धनार्पणसुधोक्तिसुप्रेरणेन।
व्यापारयोजनत आत्मसदृक्षहेभ्यान्, कृत्वाऽऽशु धर्मवरकर्मणि योजयेद्वा ॥ ११ ॥

तीर्थङ्कराज्ञाराधकानां साधर्मिकाणां निर्धनत्वेन दौःस्थ्याद्धर्मानुष्ठाने सीदतां पुनर्ग्रहणानिच्छयाऽत एवामृत-

धर्मक्रिया-प्रमादि-श्रावकाणां धर्मैकनिष्ठेन श्रावकेणापि सारणादि कर्त्तव्यमित्यधिकारः।

अर्हद्धर्म सीदतां स्वलक्ष्मीदानेन धर्मदार्ढ्यापादनाधिकारः।

॥ २९ ॥

---

१ साधर्मिकाणां वात्सल्यमेतदन्यद् व्याहृतम्। धर्मस्थानेषु सीदन्तं सर्वभावेन चोदयेत् ॥ १ ॥
२ स्मारणा वारणा चैव चोदना प्रतिचोदना। श्रावकेणाऽपि दातव्या, श्रावकाणां हितार्थम् ॥ २ ॥

दृष्ट्वा स्वधनार्पणेन सुधोक्त्या च धर्मदार्ढ्यं कारयेदुदारचरितस्सुश्रावकः, सुव्यापारादियोजनेन वा महेभ्यान् कारयित्वाऽहमहमिकाभावनयाऽधिकस्पर्धया न त्वीर्षया क्रियमाणे महाधर्मकार्ये सुधोक्त्या तान्नियोजयेत्, यथा सुरगिरौ श्रेष्ठिवर्यजगसिंहेन त्रिशतषष्टिसाधर्मिकाः स्वराशिव्यवसायकारणेनाऽऽत्मसदृक्षा महेभ्याः कृताः, प्रतिदिनमेकैकस्मिन् गेहे साधर्मिकवात्सल्यं च स तैः कारितवानिति ।

अथ शासनोन्नतिविधानेन धनी स्वधनमव्ययं कुर्यादत्रेत्युपदेशमाह–

अपूर्वमहोत्सवाद्यैश्शासनोन्नतिविधानस्य तत्फलस्य च प्रतिपादनम् ।

मिथ्यात्विनां शिवपथोन्मुखभावकर्त्रीं, श्रीशासनोन्नतिमपूर्वमहोत्सवाद्यैः ।
कृत्वाऽर्हतो बहुधनैस्स्वधनं शिवार्थी, कुर्यात्समुद्र उदबिन्दुवदव्ययं द्राक् ॥ १२ ॥

धर्मानुरक्तेन शुभाध्यवसायेनोदारभावेनाऽपूर्वमहोत्सवैः कृतां शासनोन्नतिं दृष्ट्वा जिनप्रवचनस्य श्लाघा, ततश्च केषाञ्चिल्लघुकर्मणां सम्यग्दर्शनप्राप्तिः केषाञ्चिच्च सम्यग्दर्शनबीजस्य जिनशासनपक्षपातरूपशुभाध्यवसायलक्षणस्य प्राप्तिर्जायते । उक्तञ्च यात्रापञ्चाशके–

"[1]तित्थस्स वण्णवाओ, एवं लोगम्मि बोहिलाभो य । केसिंचि होइ परमो, अन्नेसिं बीयलाभो त्ति ॥ १ ॥"

तस्मात्तां महाफलां ज्ञात्वा कृत्वा च स्वद्रव्यं समुद्रे क्षिप्तजलबिन्दुवदव्ययं कुर्यादत्र सुश्रावकः, यतो धना-

१ तीर्थस्य वर्णवाद एवं लोके बोधिलाभश्च । केषाञ्चिद्भवति परमोऽन्येषां बीजलाभ इति ॥ १ ॥

जनार्थमुद्यच्छता सप्तक्षेत्रीव्ययादिधर्ममनोरथा महान्त एव कर्त्तव्याः, सति च लाभसम्भवे "जहा लाहो तहा लोहो, लाहो लोहो पवड्ढइ" इति न्यायेन नैवातिलोभबुद्धिं कुर्यात्, किन्तु तान् सर्वान् मनोरथान् सफलीकुर्यात् सुविवेकी श्रावकः । उक्तञ्च–

"[1]ववसायफलं विहवो, विहवस्स फलं सुपत्तविणिओगो । तयभावे ववसायो,विहवोऽवि अ दुग्गइनिमित्तं १" इति ।

एवं कृते धर्मर्द्धिर्भवति, अन्यथा तु भोगर्द्धिः पापर्द्धिर्वा । उक्तञ्च–

"[2]धम्मिड्ढी भोगिड्ढी, पाविड्ढी इअ तिहा भवे इड्ढी । सा भणई धम्मिड्ढी, जा णिज्जइ धम्मकज्जेसुं ॥ १ ॥

[3]सा भोगिड्ढी गिज्जइ, सरीरभोगम्मि जीइ उवओगो । जा दाणभोगरहिआ, सा पाविड्ढी अणत्थफला ॥२॥" इति ।

अथ चैत्यपरिपाट्यादिकर्त्तव्यान्तरमाह–

चैत्यानुपूर्व्यखिलसाधुनतिस्सदानु–कम्पाख्यदानमतिमानसुपात्रदानम् ।

स्वाध्याय उत्तमतपस्विसुभक्तिभावः, कार्या च धर्मवरजागरिका मुदाऽत्र ॥ १२ ॥

---

१ व्यवसायफलं विभवो विभवस्य फलं सुपात्रविनियोगः । तदभावे व्यवसायो विभवोऽपि च दुर्गतिनिमित्तम् ॥ १ ॥
२ धर्मर्द्धिर्भोगर्द्धिः पापर्द्धिरिति त्रिधा भवेदृद्धिः । सा भण्यते धर्मर्द्धिर्या नीयते धर्मकार्येषु ॥ १ ॥
३ सा भोगर्द्धिर्गीयते शरीरभोगे यस्या उपभोगः । या दानभोगरहिता सा पापर्द्धिरनर्थफला ॥ १ ॥

चैत्यानुपूर्वीति—उक्तञ्च—

[1]"चउव्विहसंघजुए हि, गीयवाईयसुरहिनाएणं। धयधूवमहमहेणं, जिणं वंदई चेइपरिवाडिए ॥ १ ॥" इति।

तत्फलश्चैवमुक्तम्—

[2]"पज्जुसवणपव्वे जो, जिणं वंदेई चेइपरिवाडिए। सो लहई सुरलोए, इंदत्तं तहा मणुअलोए ॥ १ ॥" इति।

ततोऽखिलसाधुवन्दनैर्वैयावृत्त्यादिकैश्चाऽत्र शासनशोभा कर्तव्या। उक्तञ्च—

[3]"तह पोसहसालाए, आगच्छेइ मुणिजणं च वंदेई। पभावणसासणसोहा, कायव्वा सम्मदिट्ठीहिं ॥१॥" इति।

तत्फलश्चैवमुक्तम्—

[4]"जो वंदइ भत्तीए, साहूणं पज्जुवासणं च जो कुणइ। पज्जुसणपव्वागए, विमाणियत्तं तु सो (नरो) लहइ ॥१॥" इति।

दीनानाथेभ्यश्श्राद्धैरनुकम्पादानमपि कर्तव्यं शासनप्रभावनाङ्गत्वाज्जिनाचरितत्वाद्वा, महाव्रतानुपालनवत्। एतेन दीनादीनामसंयतत्वात्तद्दानं न युक्तं दोषपोषकत्वादित्यारेकाऽपि निरस्ता शुभपरिणामभावात्, संयतेभ्यः पुनर्ज्ञानादिगुणरत्नभाजनमेत इति सत्पात्रबुद्ध्या दानं कर्तव्यमिति। उक्तञ्च—

समस्तचैत्यसमग्रमुनिवन्दनकरणीयत्वस्य तत्फलस्य चाधिकारः

---

१ चतुर्विधसङ्घयुतो हि गीतवादित्रसुरभिनादेन। ध्वजधूपमहमहेन जिनं वन्दते चैत्यपरिपाट्या ॥ १ ॥

२ पर्युषणपर्वणि यो जिनं वन्दते चैत्यपरिपाट्या। स लभते सुरलोक इन्द्रत्वं तथा मनुजलोके ॥ १ ॥

३ तथा पौषधशालायामागच्छति मुनिजनञ्च वन्दते। प्रभावना शासनशोभा कर्तव्या सम्यग्दृष्टिभिः ॥ १ ॥

४ यो वन्दते भक्त्या साधूनां पर्युपासनं च यः करोति। पर्युषणपर्वण्यागते वैमानिकत्वं तु स (नरो) लभते ॥ १ ॥

[1]"दाणं अणुकंपाए, दीणाणाहाण सत्तिओ णेयं । तित्थंकरणातेणं, साहूण य पत्तबुद्धीए ॥ १ ॥" इति ।
अभिनवज्ञानपाठादिस्वाध्यायोऽप्यत्र कर्तव्यो महाकर्मनिर्जराकारकत्वात्, वैयावृत्त्यमपि निराशंसं विविधं महातपस्व्यादीनां कर्तव्यम्, अप्रतिपातिगुणत्वात् । उक्तश्च—

[2]"पडिभग्गस्स मयस्स व, नासइ चरणं सुयं अगुणणाए । न उ वेयावच्चकयं, सुहोदयं नासए कम्मं ॥१॥" इति ।
पुनरत्र पर्वणि जीर्णचैत्योद्धाराद्यपि कर्तव्यान्तरमाह—

देवाधिदेवविभुजीर्णगृहोद्धृतिं यः, कृत्वा सुनव्यमिव तत् स्वधनेन कुर्यात् ।
द्राक्कारयेदमृतवाग्वरनोदनेना—न्यैस्सोऽत्र पर्वणि भवाब्धितः उद्धरेत् स्वम् ॥ १४ ॥
दिव्यौषधं भविनृभावगदप्रणाशे, पुण्यालिपर्युषणपर्वसुधर्मकृत्यम् ।
वाञ्छन्ति ये सुमनसा वचसा स्तुवन्ति, निन्दन्ति न त्रिकरणेन तु तेऽपि धन्याः ॥ १५ ॥

---

१ दानमनुकम्पया दीनानाथेभ्यः शक्तितो ज्ञेयम् । तीर्थङ्करज्ञातेन साधुभ्यश्च पात्रबुद्ध्या ॥ १ ॥
२ प्रतिभग्नस्य मृतस्य वा नश्यति चरणं श्रुतमगुणनया । न तु वैयावृत्त्यकृतं शुभोदयं नश्यति कर्म ॥ १ ॥

प्रागात्तभूरिसुकृतोत्थसमाधिनैतत्, कुर्वन्ति ये त्रिकरणेन प्रफुल्लचित्ताः ।
शक्त्या जिनोक्तविधिना शिवकाङ्क्षया तै-रेवोर्व्यघैः कलुषिताऽपि कलौ पुनीता ॥ १६ ॥
सज्ज्ञानघोरसुतपोविविधक्रियात्म-नावा ह्यपारभवसिन्धुतितीर्षया ये ।
आराधनामनघपर्युषणेऽत्र वर्यां, कुर्वन्ति यान्ति च कलावपि ते दिवं द्राक् ॥ १७ ॥
स्वर्गेऽपि शाश्वतजिनप्रतिमार्चनोत्काः, प्राप्तेऽथ पर्युषणपर्वणि सोत्सवं ते ।
नन्दीश्वरेऽष्टदिवसावधि तीर्थराज-माराध्य भक्तिभरतस्सुरसद्म यन्ति ॥ १८ ॥
च्युत्वाऽऽर्हतोच्चकुलजातिभवास्ततस्ते, सज्ज्ञानदर्शनसुसंयममार्गमाप्य ।
आराध्य शुद्धमनसाऽत्र भवे भवाष्ट-मध्येऽथवा शिवशमक्षयमाप्नुवन्ति ॥ १९ ॥
स्याद्वाददर्शनसमुन्नतिबद्धकक्ष-श्रीनेमिसूरिसुकृपोक्तमिदं सुकृत्यम् ।
आराध्य शुद्धमनसा समहोत्सवं भो, भव्याः! लभध्वमतुलं शिवधामसौख्यम् ॥ २० ॥

कलिकालेऽप्याराधने स्वर्गः, तत्रापि तत-श्च्युत्वा मनुष्येऽपि च सद्धर्माप्तिः, ततो मोक्ष-श्चेत्यधिकारः

जीर्णतीर्थोद्धारादिपर्युषणपर्वसर्वकृत्येष्विह परत्र च ऋद्धिवृद्धिसुखसम्पत्त्यादिदायिषु किञ्चिन्मात्रकरणेऽप्येतावतैव कृतकृत्योऽहं नैव किमपि कर्तव्यमवशिष्टमिति न सन्तोषः कर्तव्यः, किन्तु 'श्रेयसि केन तृप्यते'! इति हेतोर्जीर्णतीर्थोद्धारादावुत्साहममुञ्चता भव्यसत्त्वेन सद्धर्मानुष्ठानप्रबलवीर्यकुठारेण भवपञ्जरं भङ्क्त्वाऽनन्तज्ञानादिचतुष्टयलक्षणस्वस्वरूपरमणतामयीं मुक्तिं शीघ्रमवाप्नुयामिति बुद्ध्या सादरं सभावं यतितव्यं, तथा-कर्तुमशक्तेनाऽपि तद्विषयाभिलाषा स्वनिन्दा तदाराधकस्तुतिश्च कर्तव्यैव, यत इह परत्र च श्रेयश्श्रेणिप्राप्तिक्रमेणाऽक्षयाव्याबाधशिवमङ्गलमालाप्राप्तिः स्यादित्यलं पल्लवितेन, विस्तरभयान्नेह विशेषतः प्रतन्यते ॥ २० ॥

मोक्षं शीघ्रमवाप्नुयामिति बुद्ध्याऽधिकशुभभावेनाराधना कर्त्तव्येत्यस्य तत्फलस्य च निरूपणम्

## ॥ श्रीपर्युषणपर्वकल्पप्रभा

अपरनाम्नी

## श्रीपर्युषणपर्वविंशिका सविवरणा समाप्ता ॥

# अथ प्रशस्तिः ।

ज्ञानाद्यनन्तगुणरत्नपयोनिधे ! त्वत्–प्रौढप्रभावगुरुदर्शनप्राज्ञसूरिः ।
अर्हन् ! प्रभो ! स्तुतगुणौघ ! गरिष्ठभक्त्या, स्वर्गेऽर्चिताऽच्छकुसुमैर्विजयादिदेवैः ॥ १ ॥
त्वद्दर्शनाश्रयगुणो विजयप्रतिज्ञ–ज्ञानां जगत्सु तिलको विजयात्सभायाम् ।
उप्त्वा नृहृद्भुवि जिनेश्वरधर्मबीजं, सिक्त्वा जिनोक्तिसुधया शुभभावपत्रम् ॥ २ ॥
वृक्षं सुमेषुविजयं त्रिजगज्जयाद्या–नन्द–प्रियङ्कर–महोदय–पुष्पवर्गम् ।
सम्पाद्य मोक्षसुफलं जनयत्यरं य–स्तत्राऽस्ति नाथ ! जिन ! ते चरणानुभावः ॥ ३ ॥
त्रिभिर्विशेषकम् ।

सम्यग्दर्शनभावनोदयलसत्स्वानन्दनम्यक्रमं, हृत्पद्मे स्वगुरोः प्रविश्य मधुपं विज्ञानरेणोर्लिहे ।
शश्वद्वागमृतप्रचारकरणाल्लावण्यमूर्त्तिं स्तुवे, तुल्यास्यं शशिनाथप्राज्ञमहितं श्रीनेमिसूरीश्वरम् ॥ ४ ॥

श्रीवर्द्धमानविभुशासनपुष्करेन्दोः, श्रीतीर्थवृद्धिगुरुयत्नत आप्तकीर्त्तेः ।
श्रीपूज्यवर्यविजयादिमनेमिसूरेः, श्रीकल्पशाख्युपमपट्टविभूषितेन ॥ ५ ॥

श्रीस्तम्भनेऽङ्कमुनिनन्दसुधांशुवर्षे, श्रीमाधवासितदले कतिथौ सुधांशौ ।
श्रीसूरिमन्त्रविधिसूरिपदं गतेन, श्रीमद्गुरोर्विजयदर्शनसूरिनाम्ना ॥ ६ ॥

श्रीविक्रमर्षिनवनन्दहिमांशुवर्षे, श्रीचैत्रमाससितनेत्रतिथीनवारे ।
श्रीस्तम्भनाधिपतिपार्श्वविभुप्रसादात्, श्रीमद्गुरोरनुपमेयकृपाऽनुभावात् ॥ ७ ॥
श्रीपर्वपर्युषणकल्पप्रभा समाप्तिं, श्रीस्तम्भने पुर इतेयमपूर्वचैत्ये ।
श्रीसज्जनास्तदुदिताचरणेन शीघ्रं, श्रीमोक्षधाम्न्यनुपमेयसुखं भजध्वम् ॥ ८ ॥

चतुर्भिः कलापकम् ।

यत्किञ्चिदत्र विषये प्रसृतं प्रमादाद्, मद्भिङ्क्षणं तदखिलं कृपया क्षमध्वम् ।
मार्गे पतन्तमसकृत्प्रहसन्त्यविज्ञाः, प्राज्ञास्समादधति तत्र गुणेक्षणा ये ॥ ९ ॥

स्याद्वादसद्दर्शनसुज्ञसूरि–भक्तात्मचेतोवररञ्जयन्ती ।
श्रीपर्वराट्पर्युषणाख्यपर्व–कल्पप्रभाऽऽकल्पमियं सुनन्द्यात् ॥ १० ॥

## ॥ अथ श्रीपर्युषणपर्वकल्पप्रभा-मूलश्लोकाः ॥



आवासराष्टकसुपौषधमग्नचित्तै-स्त्यक्ताश्रवैः प्रशमरुद्धकषायवर्गैः। श्रीकल्पसूत्रसविधिश्रवणैकतानै-राराधना जिनमतोन्नतिकाऽत्र कार्या ॥१॥ सार्द्धं कृपालुगुरुणा भवतारकेण, कार्यं प्रतिक्रमणमात्मविशुद्धिकारि। कालद्वयं जिनवरोक्तशुभाशयेन, नित्यं प्रमादपरिहारत आर्हतेन ॥२॥ सामायिकं च समभावमरौ च मित्रे, निश्शेषकर्मविषमुक्त्यहिमन्त्रकल्पम्। सावद्ययोगपरिहारदृढप्रतिज्ञं, कार्यं त्रिधा परशुचन्दनकल्पवृत्त्या ॥३॥ सर्वैरथाऽऽब्दिकप्रतिक्रमणे विधेया, सत्क्षामणाकरणतो मिथ आत्मशुद्धिः। मिथ्याऽस्तु पूर्वकृतदुष्कृतमत्र सर्वं, द्राङ् मे शिवैकमनसेति विभावनीयम् ॥४॥ स्नात्रं वरप्रशमकृद्भवभिज्जिनानां, माङ्गल्यकृत्सुरगिरौ सुरवद्विधाय। अङ्गाग्रभावविभिदा प्रवरा जिनार्चा, स्वर्गापवर्गजननी विधिना विधेया ॥५॥ ज्ञानी सुदृष्टिरपि कोपि तपो व्यपोह्य, मोक्षं गतो न च निहन्ति निकाचितं तत्। कर्माऽपि तेन विभुना शिवशर्महेता-वभ्यर्हितं गदितमित्यवगम्य विज्ञैः ॥६॥ धृत्वाऽत्र धैर्यसुविवेकवरक्षमाऽस्त्रं, जित्वा च मोहनृपमप्यमरोपसर्गे। कार्योऽष्टमादिविविधोग्रतपोविलोप-बुद्धिर्न सूर्ययशसेव शिवाभिलाषैः ॥७॥ भाग्याप्तपर्युषणपर्वणि सज्जना भोः!, सर्वप्रमादमवधूय तपः कुरुध्वम्। नाऽर्हो विलम्ब इति प्रेरणतोऽज्ञपुंसः, प्रोत्साह्य तद्धितगिराऽत्र विधापयेज्ज्ञः ॥८॥ कार्येष्टभोजनविभिन्नप्रभावनाद्यै-राभ्वादिवन्निखिलसङ्घसप्रेमभक्तिः। सङ्घो हि तीर्थकरपूजित इत्यतोऽनु-पूज्यस्य तस्य परिधापनिका प्रदेया ॥९॥ अर्हत्क्रियानिरतचित्त उपासकोऽपि, सुस्मारणादिकरणेन प्रमत्तकेषु। साधर्मिकेषु तदपूर्वहिताय भाव-वात्सल्यमर्हदुदितं हृद-

येन कुर्यात् ॥१०॥ दौःस्थ्याज्जिनाध्वपततो द्रढयेत् कुलीनान्, धर्मे धनार्पणसुधोक्तिसुप्रेरणेन । व्यापारयोजनत
आत्मसदङ्गमहेभ्यान्, कृत्वाऽऽशु धर्मवरकर्मणि योजयेद्वा ॥११॥ मिथ्यात्विनां शिवपथोन्मुखभावकर्त्रीं, श्रीशा-
सनोन्नतिमपूर्वमहोत्सवाद्यैः । कृत्वाऽर्हतो बहुधनैस्स्वधनं शिवार्थी, कुर्यात्समुद्र उदबिन्दुवदव्ययं द्राक् ॥१२॥ चै-
त्यानुपूर्व्यखिलसाधुनतिस्सदाऽनु–कम्पाऽऽख्यदानमतिमानसुपात्रदानम् । स्वाध्याय उत्तमतपस्विसुभक्तिभावः,
कार्या च धर्मवरजागरिका मुदाऽत्र ॥१३॥ देवाधिदेवविभुजीर्णगृहोद्धृतिं यः, कृत्वा सुनव्यमिव तत्स्वधनेन कु-
र्यात् । द्राक्कारयेदमृतवाग्वरनोदनेना–न्यैस्सोऽत्र पर्वणि भवाब्धित उद्धरेत्स्वम् ॥१४॥ दिव्यौषधं भविनृभावगदप्र-
णाशे, पुण्यालिपर्युषणपर्वसुधर्मकृत्यम् । वाञ्छन्ति ये सुमनसा वचसा स्तुवन्ति, निन्दन्ति न त्रिकरणेन तु तेऽपि
धन्याः ॥१५॥ प्रागात्तभूरिसुकृतोत्थसमाधिनैतत्, कुर्वन्ति ये त्रिकरणेन प्रफुल्लचित्ताः । शक्त्या जिनोक्तविधिना
शिवकाङ्क्षया तै–रेवोर्व्यघैः कलुषिताऽपि कलौ पुनीता ॥१६॥ सज्ज्ञानघोरसुतपोविविधक्रियात्म-नावा ह्यपारभव-
सिन्धुतितीर्षया ये । आराधनामनघपर्युषणेऽत्र वर्या, कुर्वन्ति यान्ति च कलावपि ते दिवं द्राक् ॥१७॥ स्वर्गेऽपि
शाश्वतजिनप्रतिमाऽर्चनोत्काः, प्राप्तेऽथ पर्युषणपर्वणि सोत्सवं ते । नन्दीश्वरेऽष्टदिवसावधि तीर्थराज–माराध्यभ-
क्तिभरतस्सुरसद्म यन्ति ॥१८॥ च्युत्वाऽऽर्हतोच्चकुलजातिभवास्ततस्ते, सज्ज्ञानदर्शनसुसंयममार्गमाप्य । आराध्य
शुद्धमनसाऽत्र भवे भवाष्ट-मध्येऽथवा शिवशमक्षयमाप्नुवन्ति ॥१९॥ स्याद्वाददर्शनसमुन्नतिबद्धकक्ष–श्रीनेमिसूरि-
सुकृपोक्तमिदं सुकृत्यम् । आराध्य शुद्धमनसा समहोत्सवं भो, भव्याः! लभध्वमतुलं शिवधामसौख्यम् ॥२०॥

इति श्रीस्वपरसमयपारावारपारीणविश्वातिशायिसर्वज्ञशासन-
समुन्नतिसमुन्नतमतिप्रकर्षाखण्डप्रौढप्रभावश्रीविद्या-
पीठादिप्रस्थानपञ्चकसमाराधकश्रीतपागच्छ-
नभोनभोमणिसंविग्नशाखीयभट्टारकाचार्य-

**श्रीविजयनेमिसूरीश्वर-**

पट्टालङ्कारास-न्यायवाचस्पति-शास्त्रविशारदोपनाम-
तपागच्छाचार्यश्री**विजयदर्शनसूरि**विर-
चिता "**पर्युषणपर्वकल्पप्रभा**"
समाप्तिमगात् आपुष्पदन्तौ श्रोतृ-
जनमनआनन्दसन्दोहं
विस्तारयताम् ।

॥ इति श्रीपर्युषणपर्वकल्पप्रभा

अपरनाम्नी

श्रीपर्युषणपर्वविंशिका ॥